
भगवत्युपनिषद्

भंते !
गोयमा !

सर्वलब्धिनिधान-पञ्चमगणधर-
श्रीसुधर्मस्वामिभगवत्प्रणीत-
भगवतीसूत्रसारसञ्चयरूपा

# भगवत्युपनिषद्

• नवसर्जनम् - सम्पादनम् •

प्राचीनश्रुतोद्धारक

प.पू.आ.श्रीहेमचन्द्रसूरीश्वरशिष्याः

प.पू.आ.श्रीकल्याणबोधिसूरीश्वराः

प्रकाशकः

श्री जिनशासन आराधना ट्रस्ट

મૂળસૂત્ર : **ભગવતીસૂત્ર/વ્યાખ્યાપ્રજ્ઞપ્તિસૂત્ર**
(પંચમ આગમ)

મૂળસૂત્રકાર : સર્વલબ્ધિનિધાન પંચમગણધર
**ભગવાન શ્રીસુધર્માસ્વામી**

ભાષા : **અર્ધમાગધી**

ગ્રંથાગ્ર : **૧૫૭૫૧**

નવસર્જન+સંપાદન : પ્રાચીનશ્રુતોદ્ધારક પ.પૂ.આ.શ્રી
**હેમચંદ્રસૂરીશ્વરજી** મહારાજાના
શિષ્ય પ.પૂ.આ.શ્રી
**કલ્યાણબોધિસૂરીશ્વરજી** મહારાજા

વિ. સં. ૨૦૬૮ • વી. સં. ૨૫૩૮ • સને ૨૦૧૨

પ્રથમ આવૃત્તિ, પ્રતિ : ૫૦૦

*No Copyright. • Reproduction Welcome.*

## પ્રાપ્તિસ્થાન


### 1) શ્રી અક્ષયભાઈ શાહ

506, પદ્મ એપાર્ટ., જૈન દેરાસર સામે, સર્વોદયનગર,
મુલુંડ (પ.), મુંબઈ-400 080. મો.: 9594555505
Email : jinshasan108@gmail.com

### 2) શ્રી ચંદ્રકાંતભાઈ સંઘવી

6-બી, અશોકા કોમ્પલેક્સ, જનતા અસ્પતાલ પાસે,
પાટણ (ઉ.ગુ.) ફોન : 9909468572

### 3) મલ્ટી ગ્રાફિક્સ

18, Vardhaman Bldg., 3rd Floor, Khotachi Wadi,
Prarthana Samaj, V. P. Road, Mumbai – 4.
Ph.: 23873222 / 23884222.
E-mail : support@multygraphics.com


---

પ્રસ્તુત પ્રકાશન જ્ઞાનનિધિમાંથી થયેલ છે. માટે ગૃહસ્થો જ્ઞાનનિધિમાં તેનું મૂલ્ય અર્પણ કરીને માલિકી કરી શકશે.

*Website : www.divineKnowledge.org.in*

## चरमतीर्थपतिः करुणासागरः श्रीमहावीरस्वामी



## અનરાધાર અનુગ્રહ



## अनन्तलब्धिनिधानः श्रीगौतमस्वामी

## पञ्चमगणधरः श्रीसुधर्मास्वामी



# કૃપા વરસે અનરાધાર

સિદ્ધાંતમહોદધિ સુવિશાલગચ્છસર્જક પ. પૂ. આચાર્યદેવ
**શ્રીમદ્વિજય પ્રેમસૂરીશ્વરજી મહારાજા**

વર્ધમાન તપોનિધિ ન્યાયવિશારદ પ. પૂ. આચાર્યદેવ
**શ્રીમદ્વિજય ભુવનભાનુસૂરીશ્વરજી મહારાજા**

અજોડ ગુરુસમર્પિત ગુણગણનિધિ પ. પૂ. પંન્યાસપ્રવર
**શ્રી પદ્મવિજયજી ગણિવર્ય**

સિદ્ધાંત દિવાકર પ. પૂ. ગચ્છાધિપતિ આચાર્યદેવ
**શ્રીમદ્વિજય જયઘોષસૂરીશ્વરજી મહારાજા**

વૈરાગ્યદેશનાદક્ષ પ. પૂ. આચાર્યદેવ
**શ્રીમદ્વિજય હેમચન્દ્રસૂરીશ્વરજી મહારાજા**

# ❀ પ્રકાશકીય ❀

કુશળ અધ્યાપકોની અધ્યાપનશૈલી એવી હોય છે, કે તેઓ પહેલા આખો પદાર્થ સમજાવી દે, પછી કહે, ‘હવે ચોપડી ખોલો, ને વાંચો.’ વાંચતા જઈએ ને જાણે વાર્તા હોય, એમ સમજાતું જાય. દુર્ગમ ગ્રંથ પણ સુગમ બની જાય.

આ જ શૈલી આગમ-અધ્યયનમાં પણ ઉપયોગી બને, એ માટે કુશળ અધ્યાપકની ગરજ સારે તેવી આ આગમ ઉપનિષદ્‌ની શ્રેણિ પ્રકાશિત કરતા રોમહર્ષ અનુભવીએ છીએ. અધિકારી સંયમી ભગવંતોનો આગમ-અભ્યાસ આ શ્રેણિ દ્વારા સુગમ બને...

અને અભ્યાસ બાદ પણ આ વિહારોપયોગી પ્રકાશનના આલંબને દીર્ઘ કાળ સુધી આગમિક પદાર્થોના પરાવર્તન થતા રહે... આ ઉપહાર આપણને બહુશ્રુતોનો ઉપહાર આપે.. એવી સહજ સંવેદના થાય છે. વંદન... પરમ કૃપાળુ પરમાત્માને. વંદન... પૂજનીય શ્રીગણધર ભગવંતો આદિ પૂર્વાચાર્યોને. વંદન... આગમ અધ્યયનનું આ આલંબન આપનાર પૂજ્યશ્રીને.

*લિ.*

***શ્રી જિનશાસન આરાધના ટ્રસ્ટ***


## ટ્રસ્ટીઓ

શ્રી ચંદ્રકુમાર જરીવાલા શ્રી પુંડરીકભાઈ શાહ
શ્રી લલિતભાઈ કોઠારી શ્રી વિનયચંદ્ર કોઠારી

णमोत्थु णं समणस्स भगवओ महावीरस्स

श्री प्रेम-भुवनभानु-पद्म-जयघोष-हेमचन्द्रसूरिभ्यो नमः

# ઘી-કેળાં

દેવો ને દેવેન્દ્રોના
આર્હતો ને પરમાર્હતોના
ઋષિઓ ને મહર્ષિઓના પ્રશ્નો
ને ઉત્તરો પ્રભુ વીરના.

ટૂંકમાં કહું તો
આપણા માટે
ઘી કેળાં.

પરમ પાવન ભગવતી સૂત્રનો
આ સારસંચય
મૂળસૂત્રની જિજ્ઞાસા જન્માવે
પદાર્થધારણામાં ઉપયોગી બને
અને ભાગવતી પદવી અર્પે
એ જ શુભેચ્છા.

– આ. કલ્યાણબોધિસૂરિ

अथ

# भगवत्युपनिषद्

श्रीवर्द्धमानं जिनवर्द्धमानं,
सूरीन्द्रमेव गुरुहेमचन्द्रम् ।
प्रणम्यं नम्यं रमणीयरम्यं,
श्रीपञ्चमाङ्गे वितनोमि सारम् ।।

नमोऽर्हदादिभ्यः। ब्राह्म्यै च लिप्यै। श्रुतस्य च। राजगृहीनगरे गुणशिलचैत्येऽर्हन् श्रीवीरः समवसृतः। जातसंशयश्च तज्ज्येष्ठो-ऽन्तेवासी श्रीइन्द्रभूतिगौतमः पृष्टवान्

प्रभुम्- किं चलत् चलितम् ?= स्थितिक्षयादुदयमागच्छद् विपाकाभिमुखीभवद् यत् कर्म तदुदितम् ? अत्राह प्रभुवीरः - एवमेतद्। एवमुदीरणाद्यधिकृत्यापि ज्ञेयानि प्रश्नोत्तराणि।

नैरयिकाणामाहारः - द्रव्यतोऽनन्तप्रदेशवन्ति पुद्गलद्रव्याणि, क्षेत्रतोऽसङ्ख्येयप्रदेशावगाढानि, कालतो जघन्यादिस्थितिकानि, भावतश्च वर्णादिमन्ति। सर्वतश्च त आहारयन्ति। आहारतया गृहीतानां पुद्गलानामसङ्ख्येयभागमाहार-

यन्ति, अनन्तभागं चाऽऽस्वादयन्ति। ते च पुद्गलास्तेषां श्रोत्रादितयाऽनिष्टत्वेन परिणमन्ति। बन्धादिगोचरभूतं कर्म जीवप्रदेशेभ्योऽचलितं भवति, इतरस्य तेष्वनवस्थितत्वात्।

असुरकुमारादेर्द्विविध आहारार्थः। स चानाभोगनिर्वर्तितोऽनुसमयम्, इतरस्तु जघन्येन चतुर्थभक्तस्योत्कृष्टेन दिवस-पृथक्त्वस्यान्ते समुत्पद्यते। एवमितरेषामपि यथायोगं द्रष्टव्यम्। पृथ्वीकायिकादेराहारा-र्थोऽनुसमयमविरहितश्चोत्पद्यते। निर्व्याघा-

तेन षड्दिग्भ्यः, व्याघातं प्रतीत्य त्रिचतुः-पञ्चदिग्भ्य आहारयन्ति।

द्वीन्द्रियादेराहारार्थोऽसङ्ख्येयसमयान्त-र्मुहूर्त्ताद्विमात्रयोत्पद्यते, स चाभोगनिर्वर्तितः, इतरस्त्वनुसमयम्। द्विविधश्च तदाहारः-लोमाहारः प्रक्षेपाहारश्च। यान् पुद्गलान् लोमाहारतया गृह्णाति, तान् सर्वानाहा-रयति, यांस्तु प्रक्षेपतया गृह्णाति, तेषाम-सङ्ख्येयभागमाहारयन्ति, अनेकानि तु भागसहस्राण्यनास्वाद्यमानान्यस्पृश्यमानानि च विध्वंसमागच्छन्ति। तेषु रसनयाऽ-

नास्वाद्यमानाः सर्वस्तोकाः, त्वचाऽस्पृश्य-मानास्त्वनन्तगुणाः। त्रीन्द्रियादेः सर्वस्तोका अनाघ्रायमानाः पुद्गलाः, अनास्वाद्यमाना अनन्तगुणाः, अस्पृश्यमाना अनन्तगुणाः।

देवानां यावत्सागरमायुस्तावत्पक्षैरुच्छ्वासः, तावद्वर्षसहस्रैश्चाहारः। सिद्धा अप्रमत्तसंयताश्चानारम्भाः। प्रमत्तसंयताः शुभयोगं प्रतीत्यानारम्भाः। अशुभयोगं प्रतीत्यात्मारम्भाः परारम्भा उभयारम्भाश्च। एवमन्येऽपि संसारिणस्त्र्यारम्भाः, न त्वनारम्भाः। अत्र हेतुरविरतिः। एवं

कृष्णादिलेश्यजीवानधिकृत्याप्यारम्भवत्त्वा-द्यूह्यम्।

ज्ञानदर्शन इहभविके परभविक उभयभविके च। चारित्रं त्विहभविकमेव। न सिध्यत्यसंवृतोऽनगारः, सप्तकर्मप्रकृतिबन्धादिगाढत्वादिसम्पादकत्वात्तस्य। संवृतस्तु सिध्यति, तद्बन्धादिशैथिल्यादिकृत्त्वात्तस्य। अविरता अप्यकामनिर्जरया वानमन्तरेषूत्पद्यन्ते।

॥१-२॥

स्वकृतं कर्मोदितं वेद्यते, नानुदितम्।

महाशरीरा नैरयिका बहुतरान् पुद्गलानाहारयन्त्युच्छ्वसन्ति च। तदप्यभीक्ष्णम्। अल्पशरीरास्त्वल्पतरानाहारयन्ति, उच्छ्वसन्ति च, तदपि कादाचित्कम्। पूर्वोत्पन्ना नारका अल्पकर्माणो विशुद्धवर्णा विशुद्धलेश्याश्च। पश्चादुत्पन्नास्तु महाकर्माणोऽविशुद्धवर्णा अविशुद्धलेश्याश्च। पर्याप्ता नारका महावेदनाः, इतरे त्वल्पवेदनाः। सद्दृष्टिनारकाणां क्रियाचतुष्कम्- आरम्भिकी, पारिग्रहिकी, मायाप्रत्यया, अप्रत्याख्यानक्रिया च। इतरेषां तु मिथ्यादर्शनप्रत्ययाऽपि।

॥ ७ ॥

असुरकुमारादेर्विशेषः- पूर्वोत्पन्ना महाकर्माणोऽविशुद्धवर्णा अविशुद्ध-लेश्याश्च। इतरे चेतरे। पृथ्वीकायिकाः सर्वे समवेदनाः, सर्वेषां तेषामसञ्ज्ञितयाऽ-निर्द्धारणया वेदनावेदकत्वात्। सर्वेऽपि ते मिथ्यादृशः पञ्चक्रियाश्च। एवं यावच्च-तुरिन्द्रियाः। पञ्चेन्द्रियतिर्यञ्चस्त्रिविधाः-सम्यङ्मिथ्यामिश्रदृष्टित्वात्। सद्दृशोऽपि द्विविधाः- अविरता देशविरताश्च। देशविरतानां क्रियात्रयम्। अविरतानां चतुष्कम्। पञ्चकं च मिथ्यादृशाम्।

मनुष्या महाशरीरा बहुतरपुद्गलाना-हारयन्ति, कदाचिच्च। अल्पशरीरास्त्व-ल्पतरानभीक्ष्णं च। शेषं नारकवत्। त्रिविधा मनुष्याः, तिर्यग्वत्। सद्दृशोऽपि त्रिविधाः- सर्वविरतदेशविरताऽविरताः। संयता द्वि-विधाः- सरागसंयता वीतरागसंयताश्च। वीतरागसंयता अक्रियाः। इतरेऽपि द्वि-विधाः- प्रमत्ता अप्रमत्ताश्च। तेष्वप्रमत्ता-नामेकैव मायाप्रत्यया क्रिया, इतरेषामार-म्भिक्यपि। देशविरतादेस्तिर्यग्वत्। वान-मन्तरज्योतिष्कवैमानिका देवा मायि-

मिथ्यादृशोऽल्पवेदनाः, अमायिसम्यग्दृशो महावेदनाः, शुभवेदनामाश्रित्य एवं लेश्यामाश्रित्यापि द्रष्टव्यं यथायोगम्।

नैरयिकसंस्थानकालस्त्रिविधः-

अशून्यकालः, (उत्पादोद्वर्त्तनाशून्यः), मिश्रकालः (एकादय उद्वृत्ता यावदेकोऽपि शेषः, न तु तमेव भवमाश्रित्य, अपि तु वार्त्तमानिकनारकजीवानां गत्यन्तरगमने तत्रैवोत्पत्तिमाश्रित्य), शून्यकालः (यदा सामस्त्येनोद्वृत्ताः, नैकोऽपि शेषः)। सर्वस्तोकोऽशून्यकालः, मिश्रकालोऽ-

नन्तगुणः, शून्यकालोऽनन्तगुणः। एवं मनुष्यदेवानामपि। तिर्यक्षु शून्यकालो नास्ति। सर्वस्तोको मनुष्यसंसारसंस्थानकालः, नैरयिकसंसारसंस्थानकालोऽसङ्ख्येगुणः, देवसंसारसंस्थानकालोऽसङ्ख्येगुणः, तिर्यग्योनिकोऽनन्तगुणः।

| जीवाः | जघन्यत उत्पादः | उत्कृष्टतः |
|---|---|---|
| असंयतभव्यद्रव्यदेवाः | भवनवासिसु | उपरितनग्रैवेयकेषु |
| अविराधितसंयमाः | सौधर्मे | सर्वार्थसिद्धे |
| विराधितसंयमाः | भवनवासिषु | सौधर्मे |
| अविराधितसंयमासंयमाः | सौधर्मे | अच्युते |
| विराधितसंयमासंयमाः | भवनवासिषु | ज्योतिष्केषु |
| असञ्ज्ञिनः | भवनवासिषु | वानमन्तरेषु |
| तापसाः | भवनवासिषु | ज्योतिष्केषु |
| कान्दर्पिकाः | भवनवासिषु | सौधर्मे |
| चरकपरिव्राजकाः | भवनवासिषु | ब्रह्मलोके |
| किल्बिषिकाः | भवनवासिषु | लान्तके |

| | | |
|---|---|---|
| तिरश्चः | भवनवासिषु | सहस्रारे |
| आजीविकाः | भवनवासिषु | अच्युते |
| आभियोगिकाः | भवनवासिषु | अच्युते |
| निह्नवाः | भवनवासिषु | उपरितनग्रैवेयकेषु |

| असञ्ज्ञिकृतम् | जघन्यतः | उत्कृष्टतः |
|---|---|---|
| नरकायुः | दशवर्षसहस्राणि | पल्योपमासङ्ख्येयभागः |
| देवायुः | दशवर्षसहस्राणि | पल्योपमासङ्ख्येयभागः |
| तिर्यगायुः | अन्तर्मुहूर्त्तम् | पल्योपमासङ्ख्येयभागः |
| मनुष्यायुः | अन्तर्मुहूर्त्तम् | पल्योपमासङ्ख्येयभागः |

| | |
|---|---|
| असञ्ज्ञिकृतम् | |
| देवायुः | सर्वस्तोकम् |
| मनुष्यायुः | असङ्ख्येयगुणम् |
| तिर्यगायुः | असङ्ख्येयगुणम् |
| नैरयिकायुः | असङ्ख्येयगुणम् |

॥१-३॥

तदेव सत्यं निःशङ्कं यत् प्रवेदितं जिनैः। एतन्मानसं स्थिरीकुर्वन्नाज्ञयाऽऽराधको भवति। अस्तित्वमस्तित्वे परिणमति। नास्तित्वं च नास्तित्वे। प्रमादो योगात्, योगो वीर्यात्, वीर्यं शरीरात्, शरीरं

च जीवात् प्रभवति। संवरादिकर्त्ता जीव एव, गुर्वादेः सहकारित्वात्, जीववीर्यस्य च प्रधानत्वात्। पृथ्वीकायिकादेर्यावच्छ्रमणानामप्यस्ति काङ्क्षामोहनीयवेदनम्, प्रवचनान्तरैः शङ्काद्युदयात्।

॥१-४॥

सम्भवति मिथ्यात्वमोहोदयेन परलोकक्रियास्वभ्युपगमः, स च बालवीर्येण। एवमपक्रमोऽपि तद्व्युच्यपगमात्। नास्त्यवेदयित्वा मोक्षः पापकर्मणः। अनुभागकर्मण्यपवादसम्भवेऽपि प्रदेशकर्मणि तद-

भावात्। यथा यथा तद् भगवता दृष्टम्, तथा तथा विपरिणंस्यतीति।

अतीतादिकालत्रयं शाश्वतम्, कदापि तदभावाभावात्। न कदापि छद्मस्थस्य केवलेन संयमादिना सिद्धिः, अपि तु केवलज्ञानमवाप्यैव मोक्षः।

॥१-५॥

| पृथ्वी | नाम | नरकावाससङ्ख्या |
|---|---|---|
| १ | रत्नप्रभा | ३० लक्षाणि |
| २ | शर्कराप्रभा | २५ लक्षाणि |
| ३ | वालुकाप्रभा | १५ लक्षाणि |

| | | |
|---|---|---|
| ४ | पङ्कप्रभा | १० लक्षाणि |
| ५ | धूमप्रभा | ३ लक्षाणि |
| ६ | तमः प्रभा | ९९,९९५ |
| ७ | तमस्तमःप्रभा | ५ |
| | सर्वसङ्ख्या | ८४ लक्षाणि |

| भवनपतिभेदः | आवाससङ्ख्या |
|---|---|
| असुरकुमाराः | ६४ लक्षाणि |
| नागकुमाराः | ८४ लक्षाणि |
| सुवर्णकुमाराः | ७२ लक्षाणि |
| वायुकुमाराः | ९६ लक्षाणि |
| दीपकुमाराः | ७६ लक्षाणि |
| दिक्कुमाराः | ७६ लक्षाणि |

| | |
|---|---|
| उदधि कुमाराः | ७६ लक्षाणि |
| विद्युत्कुमाराः | ७६ लक्षाणि |
| स्तनितकुमाराः | ७६ लक्षाणि |
| अग्निकुमाराः | ७६ लक्षाणि |

पृथ्वीकायिकादेरावासलक्षाणि - असङ्ख्यानि। ज्योतिर्विमानलक्षाणि - असङ्ख्यानि।

| **वैमानिकभेदः** | **विमानसङ्ख्या** |
|---|---|
| सौधर्मः | ३२ लक्षाणि |
| इशानः | २८ लक्षाणि |
| सनत्कुमारः | १२ लक्षाणि |
| माहेन्द्रः | ८ लक्षाणि |

| | |
|---|---|
| ब्रह्मलोकः | ४ लक्षाणि |
| लान्तकः | ५०,००० |
| शुक्रः | ४०,००० |
| सहस्रारः | ६,००० |
| आनतः<br>प्राणतः | ४०० |
| आरणः<br>अच्युतः | ३०० |
| अधस्तनग्रैवेयकत्रयम् | १११ |
| मध्यमग्रैवेयकत्रयम् | १०७ |
| उपरितनग्रैवेयकत्रयम् | १०० |
| अनुत्तरः | ५ |

रत्नप्रभादावसङ्ख्येयानि स्थितिस्थानानि भवन्ति। तद्यथा-जघन्या स्थितिः, सैव समयाधिका, एवं यावदसङ्ख्येयसमयाधिका, यावद्विवक्षितनरकावासप्रायोग्योत्कृष्टस्थितिः। एवमवगाहनास्थानान्यपि प्रदेशाधिकत्वेन वाच्यानि। क्रोधाद्युपयोगोपयुक्तता च नारकाणां यथा सप्तविंशत्यशीतिभङ्गकैरुपपद्यते तच्छ्रुताद्विज्ञेयम्। शरीरत्रयं चैषाम् वैक्रियतैजसकार्मणलक्षणम्। असंहनना हुण्डसंस्थानाश्च। सम्यङ्मिथ्यामिश्रदृष्ट्यन्यतरा भवति तेषाम्। एवं त्रिज्ञानानि त्र्यज्ञानानि वा

भवन्ति। असञ्ज्ञित उत्पन्नानामाद्यादन्त-मुहूर्त्तात्परतो विभङ्गोत्पत्तिः, अतस्तेषां प्रागज्ञानद्वयं भवति।

| पृथ्वी | लेश्या |
|---|---|
| रत्नप्रभा | कापोतलेश्या |
| शर्कराप्रभा | कापोतलेश्या |
| उपरितन-वालुकाप्रभा | कापोतलेश्या |
| अधस्तन-वालुकाप्रभा | नीललेश्या |
| पङ्कप्रभा | नीललेश्या |
| उपरितन-धूमप्रभा | नीललेश्या |
| अधस्तन-धूमप्रभा | कृष्णलेश्या |
| तमःप्रभा | कृष्णलेश्या |
| तमस्तमःप्रभा | परमकृष्णलेश्या |

नारकवदसुरकुमारादेरपि स्थितिस्थानसङ्ख्यादि ज्ञेयम्। उपयोगे लोभोपयोगसहिता सप्तविंशतिभङ्गा ज्ञातव्याः। लेश्याश्च कृष्ण-नील-कापोत-तेजोरूपाः।

पृथ्वीकायिकादीनामप्यसङ्ख्यस्थितिस्थानानि। क्रोधादिचतुष्कोपयुक्तता चैषाम्।

॥१-६॥

उदयास्तसमययोः सूर्यस्तुल्यादेवाकाशान्तराद् दृश्यते। तुल्यमेव च क्षेत्रमवस्थाद्वयेऽप्यसौ प्रकाशयति। दिक्षट्कमपि स्पृष्टमनन्तरावगाढं बादरमणुं द्वयमपि

प्रकासयति। दिक्षट्केऽपि लोकान्तोऽलोकान्तं स्पृशति, द्वीपान्तश्च सागरान्तम्।

कुक्कुट्यण्डकनीत्याऽनादिभावो लोकादेः। अष्टविधा हि लोकस्थितिः - (१) आकाशप्रतिष्ठितो वातः (२) वातप्रतिष्ठित उदधिः (३) उदधिप्रतिष्ठिता पृथ्वी (४) पृथ्वीप्रतिष्ठितास्त्रसाः प्राणाः (५) अजीवा जीवप्रतिष्ठिताः (६) जीवाः कर्मप्रतिष्ठिताः (७) अजीवा जीवसङ्गृहीताः (८) जीवाः कर्मसङ्गृहीताः। मिथः सम्बद्धास्तिष्ठन्ति जीवाः पुद्गलाश्च। सदा रात्रौ दिवसस्य च पूर्वापरयोः प्रहरयोः

स्निग्धादिकालानुसारेण प्रपतति सूक्ष्मः स्नेहकायः-अप्कायविशेषः। क्षिप्रं च विध्वंसमागच्छति।

॥१-७॥

नारकादिरुत्पद्यमानः सर्वेण सर्व उत्पद्यते, देशेन देश इत्याद्युत्पत्तिविरहात्। एवमुद्वर्त्तनाद्यपि ज्ञेयम्। आहारं तु सर्वेण देशम्, सर्वेण वा सर्वमाहारयति।

गर्भ उत्पद्यमानो जीवो द्रव्येन्द्रियाणि प्रतीत्यानिन्द्रियो भावेन्द्रियाणि प्रतीत्य सेन्द्रियो भवति। तेजःकार्मणशरीरे प्रतीत्य

सशरीर औदारिकादीनि प्रतीत्याशरीरो भवति। तत्प्रथमतायामसौ मातुः शोणितं पितुश्च शुक्रमाहारयति। ततोऽपि मातृभुक्त-नानाविकृत्येकदेशमोजं चाहारयति। नास्योच्चारादि भवति, अपि त्वाहृतं श्रोत्रा-दितयाऽस्थ्यादितया च परिणमति। नास्य कवलाहारो भवति। सर्वत आहारयति सः, सर्वत उच्छ्वासादि च करोति। मातृजीवरसहरणी पुत्रजीवरसहरणी चेति द्वे नाड्यौ मातृजीवप्रतिबद्धा पुत्रजीवं स्पृष्टा, तस्मादसावाहारयति परिणामयति च।

मात्रङ्गत्रयम् - मांसं शोणितं मस्त-कभेज्जकश्च। पित्रङ्गत्रयम् - अस्थि, अस्थिमध्यावयवः केशादिकश्च।

सम्भवति गर्भगतस्यापि वैक्रिय-समुद्धातेन परानीकेन सह सङ्ग्रामं कुर्वतस्तदन्तरे कालगतस्य नरकोत्पादः। श्रमणादिवचनश्रवणसञ्जातसंवेगधर्मानुराग-तश्च गर्भगतस्यापि सम्भवति स्वर्गोत्पत्तिः।

गर्भगतश्च जीव उत्तानादिदशावस्थितो भवति, मातुर्निद्रादि चानुकुरुते। प्रसवकाले शीर्षेण पादाभ्यां वा सम्यगागच्छति,

तिर्यगागच्छन् तु म्रियते।

॥१-८॥

एकान्तपण्डितस्य गतिद्वयमेव - अन्तक्रिया कल्पोपपत्तिका च। बाल-पण्डितस्य च देवेष्वेवोत्पादः।

मृगोपद्रवकृतः क्रियात्रयम्। तद्बन्धनमपि कुर्वतः क्रियाचतुष्कम्। तन्मारणमपि च विदधतः क्रियापञ्चकम्। यदि मृगादिः षण्मासाभ्यन्तरे म्रियते, तदा क्रिया पञ्चकम्, अन्यथा तच्चतुष्कम्।

सदृशवीर्यादिमतोरपि युद्ध्यतोः पुरुषयोस्तस्य पराजयः, यस्य वीर्यान्तरायकर्मोदयः।

शैलेषीप्रतिपन्ना लब्धिवीर्येण सवीर्याः करणवीर्येणावीर्याः, शेषसंसारिणो लब्धिवीर्येण सवीर्याः, करणवीर्येण सवीर्या अपि, अवीर्या अपि। सिद्धा अवीर्याः।

॥१-९॥

प्राणातिपातादिना कर्मगौरवम् तद्विरमणतश्च तल्लाघवम्। सप्तममवकाशान्तरमगुरुलघुकः। सप्तमस्तनुवातो गुरुलघुकः,

एव घनवातादिरपि। नैरयिका गुरुलघुकाः। एवं यावद्वैमानिकाः। धर्मास्तिकायादयोऽगुरुलघुकाः। पुद्गला गुरुलघुका अपि अगुरुलघुका अपि। द्रव्यलेश्या गुरुलघुका। भावलेश्याऽगुरुलघुका। औदारिकादिदेहचतुष्कं गुरुलघुकः, कार्मणं त्वगुरुलघुकः। मनोवाग्योगावगुरुलघुकः। काययोगो गुरुलघुकः। साकारानाकारोपयोगावगुरुलघुकौ। सर्वप्रदेशद्रव्यपर्यायाः पुद्गलवत्। अतीतानागतसर्वाध्वाऽगुरुलघुः।

आत्मा सामायिकः, तदर्थश्च। एवं

प्रत्याख्यान-संयम-संवर-विवेक-व्युत्स-र्गानामप्यर्थ आत्मा। अवद्यगर्हा संयमार्थम्। समैव राजरङ्कयोरप्रत्याख्यानक्रियाऽ-विरतिं प्रतीत्य।

आधाकर्म्मभोजी श्रमणोऽतिक्रमणं करोति धर्मस्य, नानुकम्पते पृथ्वीकायादीन्, खाद्यमानजीवशरीराणि च, अतः स शिथिलबन्धनबद्धा आयुर्वर्जसप्तकर्मप्रकृतीः घनबन्धनबद्धाः करोति, यावदनुपरिवर्तते। प्रासुकैषणीयं भुञ्जानश्चाप्नोति तद्विपरीत-फलम्।

अस्थिरं परिवर्त्तते, न स्थिरम्। शाश्वतो बालः, बालकत्वमशाश्वतम्। शाश्वतः पण्डितः, पण्डितत्वमशाश्वतम्।

॥१-१०॥

परमाणुद्वयमपि संहन्यते, तयोरपि स्नेहकायसद्भावात्। न सम्भाव्यते परमाणुभेदः, अतो परमाणुत्रये द्विधा क्रियमाण एकत एकः परमाणुः, अपरतश्च द्व्यणुकः स्कन्धस्स्यात्।

भाषणात् पूर्वमभाषा, भाष्यमाणा

भाषा, भाषासमयव्यतिक्रान्ता चाभाषा। क्रियमाणैव क्रिया सुखा दुःखा वा, न प्राक् पश्चात्। एक समय एकैव क्रियते क्रिया, एर्यापथिकी वा साम्परायिकी वा। निरय-गतिर्द्वादशमुहूर्त्तानि यावदुत्पादविरहिता प्रज्ञप्ता एवं प्रज्ञापनागतं व्युत्क्रान्तिपदमशेषं वाच्यम्।

॥२-१॥

अस्त्येकेन्द्रियाणामप्युच्छ्वासादि। जीवानामुच्छ्वासादिविषयाः - द्रव्यतोऽ-नन्तप्रदेशिकानि द्रव्याणि, क्षेत्रतोऽसङ्ख्य-

प्रदेशावगाढानि, कालतोऽन्यतरस्थिति-कानि, भावतो वर्णादिमन्ति। उच्छ्वासादि च त्र्यादिदिग्भ्य आहारवद् विज्ञेयम्। तच्च व्याघातं प्रतीत्यैकेन्द्रियाणाम्। शेषाणां नियमाद् दिग्षट्कतः। वायुकायिका अपि वायुमेवोच्छ्वासादिविषयीकुर्वन्ति।

सम्भवति प्रासुकभोजिनोऽपि मुनेः पुनः भवभ्रमणं कषायोदयात्पतितस्य। सोऽपि निरुद्धभवप्रपञ्चः सन् न पुनरागच्छति संसारे।

'द्रव्यतो लोक एकतया सान्तः,

क्षेत्रतोऽसङ्ख्येययोजनकोटाकोट्य आयामविष्कम्भतः, अतः सान्तः कालतस्त्रैकालिकतयाऽनन्तः, भावतोऽप्यनन्तवर्णादिपर्याययुततयाऽनन्तः। एवं जीवाद्यपि यथायोगं ज्ञेयम्।

द्वादशविधं बालमरणम् वशार्त्तमरणादि। अनन्तनैरयिकभवग्रहणानि तिर्यगादिभवभ्रमणं च तत्फलम्। अतस्तन्मरणतो भववृद्धिः। द्विविधं च पण्डितमरणम्- पादपोपगमनं भक्तप्रत्याख्यानं च। मोक्षश्च तत्फलम्। अत एतन्मरणतो

भवहानिः।'

श्रीवीरान्तिके स्कन्दकपरिव्राजक एतच्छ्रुत्वा धर्मकथां च निशम्याऽऽह- श्रद्दधामि निर्ग्रन्थं प्रवचनम्, इच्छित-प्रतीच्छितं चैतत्, यद्यूयं वदत-इत्युक्त्वोत्तरपूर्वस्यां दिशि त्रिदण्डादि मुक्त्वा भगवन्तं त्रिकृत्वः प्रदक्षिणा दत्त्वाऽऽह- भदन्त ! आदीप्तः प्रदीप्तश्च लोको जरामरणाभ्याम्। यथा गृही गृहप्रदीपने सति महार्घ्यभाण्डं गृहीत्वैकान्तेऽपक्रामति, एतन्निस्तीर्णं मम हिताय स्यादिति च चिन्तयति, एवं हे

देवानुप्रिय ! ममाऽप्यात्मा प्रियभाण्डोपमः, अतः स निस्तारितः सन् मम परलोकस्य हिताय भविष्यति। तस्मादिच्छामि स्वयमेव, प्रव्राजितं मुण्डापितं सेहितं शिक्षितमाचारादिगोचरमाख्यातं च।

ततः श्रमणो भगवान् महावीरः स्कन्दकं स्वयमेव प्रव्राजयति यावद् धर्ममाख्याति- एवं देवानुप्रिय ! गन्तव्यम्, एवं स्थातव्यम्, एवं निषीदव्यम्, एवं त्वग्वर्त्तितव्यम्, एवं भोक्तव्यम्, एवं भाषितव्यम्, एवमुत्थाय प्राणैर्भूतैर्जीवैः

सत्त्वैः संयमेन संयमितव्यम्। अस्मिंश्चार्थे नैव किञ्चिदपि प्रमादयितव्यम् - इति।

स्कन्दकः सम्यक् प्रतिपद्यत एतद्धार्मिकमुपदेशम्। भवत्यष्टप्रवचनमातृपरिपालको गुप्तो गुप्तब्रह्मचारी त्यागी संयमी धन्यः क्षान्तिक्षमो जितेन्द्रियः शोधितो जीवमित्रोऽनिदानोऽत्वरोऽबहिर्लेश्यः सुश्रामण्यरतो दान्तश्च सन् इदमेव निर्ग्रन्थं प्रवचनं पुरतः कृत्वा विहरति। एकादशाङ्गानि स्थविरान्तिकेऽधीत्य, द्वादशभिक्षुप्रतिमा आराध्य, गुणरत्नसंवत्सरतपः कृत्वा,

मासक्षपणादिबहुतपांसि विधाय, कृशतमो भवति। भाषणादावप्यसमर्थो भवति। सशब्दं च चलनादि कुरुते, तपसोपचितोऽपचितस्तु मांसशोणिताभ्यां हुताशन इव भस्मराशिप्रतिच्छन्नः सन् तपस्तेजः-श्रियाऽतीवोपशोभमानस्तिष्ठति। श्रीवीरानुज्ञया च विधिनाऽनशनं प्रपद्य षष्टिभक्तान्यनशनतश्छित्त्वा कालं कृत्वाऽच्युतकल्पं गतः। ततोऽपि च्युत्वा महाविदेहे सेत्स्यति।

॥२-२॥

सप्त समुद्धाता वेदनादयः। वाच्यमत्र

समुद्घातपदं छाद्मस्थिकसमुद्घातवर्जम्।

॥२-३॥

उत्पन्नपूर्वा सर्वे जीवाः सप्तनरकेष्व-सकृदथवाऽनन्तकृत्वः। जीवाभिगमे यो नैरयिकाणां द्वितीय उद्देशः, स नेतव्यः।

॥२-४॥

पञ्चेन्द्रियाणि प्रज्ञप्तानि। प्रज्ञापनागतेन्द्रियपदस्याद्य उद्देशको नेतव्यः।

॥२-५॥

देवोऽन्यदेवसत्कदेव्यो वशीकृत्य

परिभुङ्क्ते, स्वदेव्यो वा, न त्वात्मानमेव विकुर्व्य विकुर्व्य परिभुङ्क्ते। एक जीव एकसमय एकमेव वेदं वेदयति।

| गर्भः | स्थितिः | |
|---|---|---|
| | जघन्या | उत्कृष्टा |
| उदक गर्भः | १ समयः | षण्मासाः |
| तिर्यग्गर्भः | अन्तर्मुहूर्त्तम् | अष्टसंवत्सराः |
| मनुष्यगर्भः | अन्तर्मुहूर्त्तम् | द्वादशसंवत्सराः |

स्त्रीगर्भे स्वशरीरे द्वादश वर्षाणि स्थित्वा पुनस्तत्रैव द्वादशवर्षस्थितिकतया चतुर्विंशतिवर्षाणि यावत्तत्र कायभवस्थ-

स्तिष्ठति। मनुष्यपञ्चेन्द्रियतिर्यग्योनिकबीज-स्थितिर्जघन्यतोऽन्तर्मुहूर्त्तम्, उत्कृष्टतो द्वादशमुहूर्त्तानि। एकजीव उत्कृष्टतः शत-पृथक्त्वजीवानां पुत्रतया भवति। एकजीव-स्योत्कृष्टतो लक्षपृथक्त्वपुत्रा एकभवे भवन्ति। यथा रुतनालिकादि तप्तकनकेन समभिध्वंसयतोऽसंयमः, तथा मैथुनं कुर्वतोऽपि।

तुङ्गिकानगरीश्राद्धा देवैरपि निर्ग्रन्थ-प्रवचनाच्चालयितुमशक्याः, निःशङ्किता-श्चात्र, लब्धार्थाः, गृहीतार्थाः, पृष्टार्थाः,

अभिगतार्थाः, विनिश्चितार्थाश्च, अस्थिमिञ्जाप्रेमानुरागरक्ता जिनशासने, 'निर्ग्रन्थप्रवचनमेवार्थः परमार्थश्च, शेषं सर्वमप्यनर्थभूतम्'- इति मन्यमानाः शीलगुणप्रत्याख्यानपौषधनिरताः सुपात्रदानपरायणाश्चात्मानं यथाप्रतिपन्नतपोभिर्भावयन्तो विहरन्ति।

ते च पञ्चश्रमणशतपरिवृतपार्श्वापत्यीयस्थविरानागतान् विज्ञाय पञ्चविधेनाभिगमेनाभिगच्छन्ति, तद्यथा- (१) सचित्तव्युत्सर्गः (२) अचित्तापरिहारः (३)

एकशाटिकोत्तरासङ्गः (४) चक्षुःस्पर्शेऽञ्जलिप्रग्रहः (५) मनस एकाग्रीकरणम्। ततः त्रिकृत्वः प्रदक्षिणीकृत्य त्रिविधपर्युपासनया पर्युपासन्ति। देशनां निशम्य प्रश्नानि पृच्छन्ति- संयमः किंफल इत्यादीनि। अत्रोत्तराणि - संयमोऽनाश्रवफलः। तपो निर्जराफलम्। पूर्वतपःसंयमकर्म्मितासङ्गिताभ्यो देवा देवतयोत्पद्यन्ते। सरागतपःप्रभृतेर्देवत्वावाप्तिः, अरागतस्तु निर्जरादिरिति हृदयम्।

श्रमणादिपर्युपासनतः श्रवणम्, ततो

ज्ञानम्, ततो विज्ञानम्, ततः प्रत्याख्यानम्, ततः संयमः, ततोऽनाश्रवः, ततस्तपः, ततो निर्जरा, ततोऽक्रिया, ततश्च सिद्धिः।

॥२-६॥

मन्य इत्यवधारिणी भाषा। भाषापदं नेतव्यम्।

॥२-७॥

चतुर्विधा देवाः-वैमानिकाद्याः। स्थानपदे देववक्तव्यता नेया।

॥२-८॥

जम्बूद्वीपस्थमेरोर्दक्षिणदिश्यसङ्ख्य-

द्वीपसमुद्रान् व्यतिव्रज्यारुणवरद्वीपः, तद्वेदिकान्तादरुणोदकसागरं द्विचत्वारिंशद्योजनसहस्राण्यवगाह्य चमरेन्द्रस्य तिगिच्छिकूटनामोत्पातपर्वतः। स १७२१ योजनान्युच्चत्वेन। ४.५ योजनान्युद्वेधेन। मूले १०२२ योजनान्यस्य विष्कम्भः। मध्ये ४२४। उपरि ७२३। एवं महामुकुन्दसंस्थानोऽसौ सर्वरत्नमयो रमणीयश्च। परिक्षिप्तोऽसौ पद्मवरवेदिकया वनषण्डेन च। तदुपरि मध्यदेशे प्रासादावतंसकः। स च २५० योजनान्युच्चः। विष्कम्भोऽस्य

१२५। तत्राष्टयोजनमाना मणिपीठिका। तस्यां चमरेन्द्रस्य सिंहासनं सपरिवारम्।

एतत्पर्वतात् ६,५५,३७,५०,००० योजनानि दक्षिणदिशि तिर्यग् गत्वाऽरुणोदे सागरेऽधो रत्नप्रभापृथिव्या ४०,००० योजनान्यवगाह्य चमरेन्द्रस्य राजधानी चमरचञ्चा लक्षयोजनमिताऽऽयामविष्कम्भतः। तत्प्राकारः १५० योजनान्युच्चः। मूले ५० योजनानि तद्विष्कम्भः। उपरि १२.५। कपिशीर्षकाश्च तत्रार्धयोजनाऽऽयामाः। ततोदेशोनोच्चत्वाश्च।

तत्र प्रतिबाहं ५०० द्वाराणि। प्रत्येकं २५० योजनान्युच्चत्वेन, १२५ योजनानि विस्तरतः। तदन्तः १६००० योजनमाना पीठिका। तस्यां मूलप्रासादस्तत्परिकर इशानदिशि सभा सुधर्मा, जिनालयः, उपपातसभा, ह्रदः, अभिषेकसभा, अलङ्कारसभा च क्रमतो व्यवस्थिताः। विजयदेवसङ्कल्पादिवन्नेयम्।

॥२-९॥

समयक्षेत्रं सार्धद्वयद्वीपसागरद्वय-लक्षणम्। जीवाभिगमवक्तव्यता नेया।

॥२-१०॥

पञ्चास्तिकायाः - धर्मादयः। तेषु पुद्गलवर्जा वर्णादिशून्याः। धर्म्मो गमनगुणः। अधर्म्मस्स्थानगुणः। आकाश-मवगाहनागुणम्। जीव उपयोगगुणः। पुद्गलं ग्रहणगुणम्। धर्मा-ऽधर्म-लोका-काश-जीव-पुद्गलाः प्रत्येकं लोक-प्रमाणाः। अधोलोके धर्म्मास्तिकायादेः सातिरेकार्द्धभागः स्पृशति। तिर्यग्लोके-ऽसङ्ख्येयभागः। उद्ध्र्वलोके देशोना-र्द्धभागः।

॥३-१॥

चमरेन्द्रस्य ३४ लक्षभवनावासाः। ६४ सहस्रसामानिकाः। ३३ त्रायस्त्रिंशाश्च। समर्थोऽसौ वैक्रियसमुद्घातेनाखिलजम्बूद्वीपं तिर्यगसङ्ख्यद्वीपसमुद्रानसुरकुमारदेवदेवीभिरवगाढं कर्त्तुम्। विषयमात्रमस्यैवमुदितम्। न तु कदाप्यसावकार्षीत् करोति करिष्यति वा। एवं सामानिका अपि। त्रायस्त्रिंशा अपि। लोकपालेषु विशेषः - सङ्ख्येयद्वीपसमुद्रा वाच्याः।

एवं तदग्रमहिषीणां बलीन्द्रादीनामपि

बलप्रभृति यथागमं ज्ञेयम्। वाच्यं च तामलितापसोग्रतपः, अनशनप्रतिपत्तिः, बलीन्द्रतया भवितुं निदानकरणाय तम्प्रति प्रार्थनाऽसुरदेवदेवीनाम्, ईशानेन्द्रतया तदुत्पत्तिः, स्वमृतकावज्ञातृणामसुरदेव-देवीनां शासनं च।

स्थितिस्तस्य साधिकसागरद्वयम् च्युत्वा सेत्स्यति महाविदेहे। शक्रविमाने-भ्यस्तद्विमानानीषदुच्चतराणि। शक्र आदृत एव ईशानेन्द्रसमीपे गमनादि कर्त्तुं शक्तः। ईशानेन्द्रस्त्वादृतोऽनादृतो वापि तदर्थ-

मलम्। तयोर्विवादे स्मरतस्तौ सनत्कुमारेन्द्रम्। ततः स क्षिप्रमेव तयोरन्तिके प्रादुर्भवति। तदाज्ञां च तौ मन्येते।

सनत्कुमारेन्द्रो भवसिद्धिकः सम्यग्दृष्टिः परित्तसंसारकः सुलभबोधिराराधकश्चरमश्च, चतुर्विधसङ्घसत्कहितसुखपथ्यकामित्वात्, तदनुकम्पापरत्वात्, तन्निःश्रेयोऽभिलाषित्वाच्च। तत्स्थितिः सप्त सागराः। ततश्च्युत्वा सेत्स्यति विदेहे।

॥३-२॥

असुरकुमाराणामधो गतिविषयः

सप्तमीं पृथ्वीं यावत्। तृतीयां तु गता गमिष्यन्ति च, पूर्ववैरिणो वेदनोदीरणार्थम्, पूर्वसङ्गतिकस्य वा तदुपशामनार्थम्।

तिर्यग्गतिविषयोऽसङ्ख्येयद्वीपसमुद्राः। नन्दीश्वरद्वीपं तु गता गमिष्यन्ति च, अर्हज्जन्माद्युत्सवेषु।

ऊर्ध्वं गतिविषयो यावदच्युतकल्पः। सौधर्मं तु गता गमिष्यन्ति च, भव-प्रत्ययिकवैरानुबन्धात्, मिथः समृद्धिदर्शन-हेतोश्च। एतद्गमनमपि लोकाश्चर्यभूतम-नन्तोत्सर्पिण्यवसर्पिणीषु व्यतिक्रान्तासु

भवति। असुरकुमारा अर्हतस्तच्चैत्यानि भावितात्मानगारान् वा निश्रीकृत्य सौधर्मं यावदुर्ध्वमुत्पतन्ति।

ज्ञातव्योऽत्र चमरेन्द्रस्य शक्रपरिभवाय सौधर्मगमनव्यतिकरः, श्रीवीरशरणोरीकारेण वज्रप्रहाराद्विमुक्तिः सपरिवारकृता भगवद्-भक्तिश्च।

पुद्गलं क्षिप्तं सत् प्राक् तीव्र-गतिर्मन्दवेगश्च पश्चाद् भवति। महर्द्धिकस्तु देवः पूर्वं पश्चाद्वापि त्वरितस्त्वरितगतिरेव। अतो देवस्तद् ग्रहीतुं समर्थो भवति।

किञ्चासुरकुमाराणामधोगतिविषयः शीघ्रः, उर्ध्वं तु मन्दः। वैमानिकानामुर्ध्वगतिविषयः शीघ्रः, अधस्तु मन्दः। यावत्क्षेत्रं शक्र उर्ध्वमुत्पतत्येकेन समयेन, तद् वज्रं द्वाभ्यां समयाभ्याम्, चमरश्च त्रिभिः। यावत्क्षेत्रं चमरोऽधोऽवपतत्येकेन समयेन, तच्छक्रो द्वाभ्याम्, वज्रं त्रिभिः। अतोऽसमर्थः शक्रः स्वहस्तेन चमरं ग्रहीतुम्।

शक्रः सर्वस्तोकं क्षेत्रमधोऽवपतत्येकेन समयेन, तत्सङ्ख्येयभागे तिर्यग् गच्छति, तत्सङ्ख्येयभागे चोर्ध्वमुत्पतति।

वज्रमप्येवमेव, किन्तु विशेषाधिकम्।

सर्वस्तोकं क्षेत्रं चमर उर्ध्वमुत्पतत्येकेन समयेन, तिर्यक् तत्सङ्ख्येयभागे, अधस्तत्सङ्ख्येयभागे।

शक्रस्योत्पतनकालश्चमरस्य चावपतनकाल एतौ द्वावपि तुल्यौ सर्वस्तोकौ। शक्रस्यावपतनकालो वज्रस्य चोत्पनकाल एतौ द्वावपि तुल्यौ सङ्ख्येयगुणौ। चमरस्योत्पतनकालो वज्रस्य चावपतनकाल एतौ द्वावपि तुल्यौ विशेषाधिकौ।

चमरस्थितिः सागरोपमम्। ततः

सेत्स्यति विदेहे।

॥३-३॥

पञ्च क्रियाः - कायिक्याद्याः।

| | |
|---|---|
| (१) **कायिकी** - | अनुपरतकायक्रिया<br>दुष्प्रयुक्तकायक्रिया |
| (२) **अधिकरणिकी** - | संयोजनाधिकरणक्रिया,<br>निर्वर्त्तनाधिकरणक्रिया |
| (३) **प्राद्वेषिकी** - | जीवप्राद्वेषिकी,<br>अजीवप्राद्वेषिकी |
| (४) **पारितापनिकी** - | स्वहस्तपारितापनिकी,<br>परहस्तपारितापनिकी |
| (५) **प्राणातिपातक्रिया** | -स्वहस्तप्राणातिपातक्रिया,<br>परहस्तप्राणातिपातक्रिया |

प्राक् क्रिया पश्चाद् वेदना भवति। श्रमणानामपि प्रमादतो योगतश्च भवति क्रिया। यावद्धि जीवस्य चलनादि, तावन्न तस्यान्तक्रिया, तावत्तस्यारम्भादिवर्त्तितया बहुसत्त्वपरितापनादिवर्त्तित्वात्। अपि चात्मसंवृतस्याप्यनगारस्यायुक्तं गमनादि कुर्वतः सूक्ष्मेर्यापथिकी क्रिया क्रियते। सा प्रथमसमयबद्धपुष्टा, द्वितीयसमयवेदिता, तृतीयसमयनिर्जीर्णा च। एष्यत्कालेऽकर्म भवति। अतो यावच्चलनादि तावदन्त-क्रियाविरहः।

सर्वः प्रमत्तसंयताध्वा - एकजीवं प्रतीत्य जघन्येनैकसमयः, उत्कर्षेण देशोना पूर्वकोटिः। नानाजीवान् प्रतीत्य सर्वाध्वा।

सर्वोऽप्रमत्तसंयताध्वा - एकजीवं प्रतीत्य जघन्येनान्तर्मुहूर्त्तम्, उत्कर्षेण देशोना पूर्वकोटिः। नानाजीवान् प्रतीत्य सर्वाध्वा।

॥३-४॥

नालं वायुकायः पुरुषादिरूपं वि-कुर्वितुम्, स एकं महत् पताकासंस्थितं रूपं विकुर्वति। तत आत्मर्द्धयाऽनेकयोजनानि

गन्तुं शक्नोति। बलाहकस्तु स्त्र्यादिरूपं विकुर्वितुमलम्। ततः स परर्द्ध्याऽनेक-योजनानि गन्तुं समर्थः।

यल्लेश्यानि द्रव्याणि पर्यादाय जीवः कालं करोति, तल्लेश्येषु जीवेषु स उत्पद्यते। विकुर्वणा बाह्यपुद्गलपर्यादानेनैव भवति। तां च कुर्वाणोऽनगारो मायी भवति। भुक्त्वा भुक्त्वा प्रणीतभोजनं स वमति वर्णाद्यर्थम्। अमायी तु रूक्षं भुक्त्वा न वमति। प्रतनु भवत्यस्यास्थ्यादि। एवं विकुर्वणाप्रमादोऽप्यस्य न स्यात्। मायी

तत्स्थानस्यानालोचितप्रतिक्रान्तः कालं करोति, तस्य नास्त्याराधना। अमायी तत्स्थानस्यालोचितप्रतिकान्तः कालं करोति, अस्ति तस्याराधना।

॥३-५॥

अलं भाविताऽऽत्मानगारोऽखिल-जम्बूद्वीपमनेकस्त्रीरूपैराकीर्णं कर्त्तुम्। विषयमात्रमेतत्, नाकार्षीत् करोति करिष्यति वा। विकुर्वणाकृदनालोचित-प्रतिक्रान्तः कालं कृत्वाऽन्यतराऽऽभियो-गिकदेवतयोत्पद्यते। इतरस्त्वनाभियोगिक-

देवतया।

॥३-६॥

मायी मिथ्यादृष्टिर्भावितात्मानगारी वैक्रियलब्ध्या समवहतः सन् न तथाभावं जानाति पश्यति, अपि, त्वन्यथाभावम्। सम्यग्दृष्टिस्त्वमायी तथाभावं जानाति पश्यति, अविपर्यस्तत्वात्तद्दर्शनस्य।

चमरेन्द्रस्यात्मरक्षकदेवाः - ६४ सहस्राणि, तद्वर्णको यथा राजप्रश्नीये। एवमन्येषामपीन्द्राणां यथायोगमात्मरक्षका वाच्याः।

॥३-७॥

| शक्रलोक-पालाः | विमानानि | दिक् | राजधानी |
|---|---|---|---|
| सोम | सन्ध्याप्रभम् | पूर्वा | सोमा |
| यम | वरशिष्टम् | दक्षिणा | यमा |
| वरुणः | शताञ्जलम् | पश्चिमा | वारुणी |
| वैश्रमणः | वल्गु | उत्तरा | कूबेरी |

| पुत्रस्थानीयाः | ज्ञाताः (दक्षिण-जम्बूद्वीपे) | आयुः |
|---|---|---|
| विकालको नवग्रहाश्च | ग्रहण-गर्जितादयः | सत्रिभागं पल्योपमम् |
| परमाधार्मिकाः | सङ्ग्राम-रोगादयः | सत्रिभागं पल्योपमम् |
| कर्कोटकादयः | अति-वृष्ट्यादयः | देशोन-पल्योपमद्वयम् |
| पूर्णभद्रादयः | सुवर्णवृष्टि-निधानादीनि | पल्योपमद्वयम् |

॥३-८॥

भवनपतयः

| देवाः | स्वामिनः |
|---|---|
| असुरकुमाराः | चमरेन्द्रादयो दश |
| नागकुमाराः | धरणेन्द्रादयो दश |
| सुवर्णकुमाराः | वेणुदेवादयः षट् |
| विद्युत्कुमाराः | हरिकान्तादयः षट् |
| अग्निकुमाराः | अग्निशिखादयः षट् |
| द्वीपकुमाराः | पूर्णादयः षट् |
| उदधिकुमाराः | जलकान्तादयः षट् |
| दिक्कुमाराः | अमितगत्यादयः षट् |
| वायुकुमाराः | वेलम्बादयः षट् |
| स्तनितकुमाराः | घोषादयः षट् |

| देवाः | स्वामिनः |
| --- | --- |
| पिशाचकुमाराः (वानमन्तराः) | कालादयः षोडशः |
| ज्योतिष्काः | चन्द्रः सूर्यश्च |
| सौधर्मेशानसुराः | शक्रादयो दश |

एवमन्येष्वपि यथायोगं ज्ञेयम्।

॥३-९॥

इन्द्रियविषयाः पञ्च। नेतव्यो जीवाभिगमस्य ज्योतिष्कोद्देशः।

॥३-१०॥

चमरेन्द्रस्य पर्षत्त्रयम् - समिता चण्डा जाता। एवं यावदच्युतकल्पः।

॥४-१॥ → ॥४-८॥

ज्ञेयाऽत्र शक्रलोकपालवदीशानलोक-पाल वक्तव्यता। विशेषो विमाननामादौ।

॥४-९॥

नैरयिको नैरयिकेषूत्पद्यते। एवं प्रज्ञापनागतलेश्यापदतृतीयोद्देशको वाच्यः, यावज् ज्ञानानि।

॥४-१०॥

लेश्यापरिणामादिप्ररूपणा लेश्यापद-तुर्योद्देशकवन्नेया।

॥५-१॥

आगच्छतो जम्बूद्वीपसूर्यावुत्तर-पूर्वादिदिक्क्रमेण। यदा दक्षिणार्धे जम्बूद्वीपे दिवसो भवति, तदोत्तरार्धेऽपि दिवसो भवति, रात्रिस्तु पूर्वपश्चिमयोः। यदोत्तर-दक्षिणयोरुत्कृष्टोऽष्टादशमुहूर्त्तमानो दिवसो भवति, तदा पूर्वपश्चिमयोर्जघन्या द्वादश-मुहूर्त्तमाना रात्रिर्भवति। एवमेतद्विपरीतमपि ज्ञेयम्, वर्द्धमानरात्र्यादिप्रमाणं च।

यदोत्तरार्धे वर्षादेः प्रथमसमयस्तदा दक्षिणार्धेऽपि। एवमवसर्पिण्यादेरप्याद्य-समयसाम्यम्। पूर्वपश्चिमयोस्त्ववस्थित-त्वात्कालस्य नास्त्यवसर्पिण्युत्सर्पिणी वा।

एवं जम्बूद्वीपवल्लवणसमुद्रादेर्वक्त-व्यताऽपि वाच्या।

॥५-२॥

वान्ति मनाक्स्नेहवत्त्वादियुता वाताः पूर्वादिदिग्भ्यः। यदा पूर्वदिशस्तदा पश्चिम-दिशोऽपि एवं विदिक्ष्वपि एवं द्वीपादिसत्का अपि वान्ति वाता अन्योऽन्यव्यत्यासेन।

यदा वायुः प्रकृत्योत्तरक्रियया वा चलति; तदा वाति।

ओदनादयः पूर्वभावप्रज्ञापनां प्रतीत्य वनस्पतिशरीराणि, पश्चाच्छस्त्रातीततयाऽग्निशरीराणि। एवं अयोऽस्थिभस्मादिकमपि प्रतीत्य यथायोगं वाच्यम्।

॥५-३॥

एको जीव एकसमय एकमायुः प्रतिसंवेदयति, इहभवायुर्वा परभवायुर्वा। नैरयिकादावुत्पद्यमानो जीव सायुष्क एव सङ्क्रमति, न निरायुष्कः।

॥५-४॥

छद्मस्थः स्पृष्टान् दुन्दुभिप्रभृतिशब्दान्, नियमाद् दिक्षट्कात् शृणोति। केवली त्विन्द्रियविषयगतान् तदतीतांश्चापि जानाति पश्यति अनन्तज्ञानादिमत्त्वात्तस्य।

छद्मस्थवन्न केवली हसनादि कुर्यात्, प्रक्षीणचारित्रमोहनीयत्वात्, तदुदयफलत्वाच्च हसनादेः। हसनादिना सप्तविधकर्मबन्धोऽष्टविधकर्मबन्धो वा। एवं निद्रां प्रतीत्यापि वाच्यम्।

हरिणैगमेषी स्त्रीगर्भं संहरन् संस्पृश्य

संस्पृश्याव्याबाधेन योन्या गर्भं संहरति। अलमसौ नखाग्रे प्रवेशयितुं रोमकूपाद्वा निष्काशयितुम्, न तु तस्य गर्भस्य काममप्याबाधामुत्पादयेत्। छविच्छेदं पुनः कुर्यात्। एवं शीघ्रं संहरेत्।

वाच्यमत्रातिमुक्तमुनेः प्रतिग्रहरूपनावारमणम्, तद्दर्शनात्स्थविराणां तद्दूरभव्यत्वशङ्का, श्रीवीरपृच्छा, तच्चरमशरीरित्वप्ररूपणा तद्वैयावृत्त्योपदेशश्च श्रीवीरस्य।

महाशुक्रदेवद्वयेन मनसा पृष्टः श्रीवीरो मनसैवोत्तरयति - मम सप्तान्तेवासिशतानि

सेत्स्यन्तीति।

न देवाः संयतपदेन वाच्याः, अभ्याख्यानरूपत्वात्। नाप्यसंयता इति, निष्ठुरवचनत्वात्। नापि संयतासंयता इति, असद्भूतत्वात्। अतो नोसंयता इति वाच्याः। देवभाषा- अर्धमागधी। प्रमाण-चतुष्कम् - प्रत्यक्ष - अनुमान-औपम्य-आगमलक्षणम्। यथानुयोगद्वारे तथा नेयम्।

अनुत्तरदेवा तत्र गता एवेहगत-केवलिना सह पृच्छार्थमालापादि कर्त्तुं समर्थाः, लब्धानन्तमनोद्रव्यवर्गणत्वात्।

अनुत्तरोपपातिका उपशान्तमोहाः, नोदीर्णमोहाः, नापि क्षीणमोहाः। न केवली इन्द्रियैर्जानाति पश्यति, केवलित्वेन निर्वृतदर्शनतया मितामितज्ञत्वात्।

अस्मिन् समये येष्वाकाशप्रदेशेषु हस्ताद्यवगाह्य केवली तिष्ठति, स एष्यत्समयेऽपि तेष्वेव हस्ताद्यवगाह्य स्थातुं न शक्नोति, वीर्यसयोगसद्द्रव्यतया चलोपकरणार्थत्वात्।

शक्तश्चतुर्दशपूर्वी घटादेर्घटसहस्रादि कर्तुम्, उत्कारिकाभेदभिद्यमानानन्त-

द्रव्याणां तल्लब्धप्राप्ताभिसमन्वागतत्वात्।

॥५-५॥

न सर्वजीवानां समानवेदना, स्वकृतकर्मानुरूपत्वात्तस्याः।

॥५-६॥

हिंसाऽसत्यमप्रासुकानैषणीयाशनादिना श्रमणादिप्रतिलाभनं चाल्पायुर्बन्धहेतवः। एतदितरे चेतरायुर्बन्धहेतवः। अशुभदीर्घायुर्बन्धहेतवः - हिंसाऽसत्यं श्रमणादेर्हीलनादि तत्प्रतिलाभनेन चामनोज्ञाप्रीति-

कृदशनाद्यैः। शुभदीर्घायुर्बन्धश्चैतद्विपरीतहेतुभिः।

अपहृतभाण्डगवेषकस्य गाथापतेरारम्भिकी-पारिग्रहिकी - मायाप्रत्ययिकी-अप्रत्याख्यानीक्रियाः क्रियन्ते, मिथ्यादर्शनक्रिया स्यात् क्रियते, स्यान्न क्रियते। प्राप्ते तु भाण्डे सर्वा अप्येताः प्रतनुका भवन्ति। क्रयिकेण भाण्डेऽनुपनीते गाथापतेस्ताः क्रियाः क्रियन्ते। प्रतनुकास्तु भवन्ति क्रयिकस्य। उपनीते क्रयिकस्य ताः क्रियाः, प्रतनुकास्तु गाथापतेः।

अधुनोज्ज्वलितोऽग्निकायो महाकर्मतरः, समये समये व्यवकृष्यमाणस्तु चरमकालसमयेऽङ्गारभूतो मुर्म्मुरभूतो भस्मभूतो भवति। ततः पश्चादल्पकर्मतरो भवति।

धनुषेषुं क्षिप्त्वा जीवान् यावत् जीविताद् व्यपरोपयन् पञ्चक्रियाभिः स्पृष्टः। येषामपि जीवानां शरीरेभ्यो धनुरादिकं निर्वर्तितम्, तेऽपि पञ्चक्रियाभिः स्पृष्टाः। यदीषुरात्मनः गुरुत्वेन विस्रसया पतन् जीवान् यावज् जीविताद् व्यपरोपयति, तदा पुरुषादयः क्रियाचतुष्टयेन स्पृष्टाः। इषुस्त-

दवग्रहस्थिता जीवाश्च तत्पञ्चकेन।

आचार्योपाध्यायः स्वविषये गण-मग्लान्या सङ्गृह्णनुपगृह्णन् तेनैव भवग्रहणेन द्वितीयेन वा सिध्यति, तृतीयं पुनर्भवग्रहणं नातिक्रमति।

॥५-७॥

परमाण्वादि स्याच् चलनादि करोति, स्यान्न करोति। अवगाहेत परमाणु-रसिधारम्, न तु छिद्येत, शस्त्रागोचरत्वात्। अनर्धोऽमध्योऽप्रदेशश्च परमाणुः। द्वि-प्रदेशिकः स्कन्धः सार्धोऽमध्योऽप्रदेशः।

त्रिप्रदेशिकोऽनर्धः समध्यः सप्रदेशः। एवं समा द्विप्रदेशिकवत्। विषमास्त्रिप्रदेशिकवत्। परमाणुः परमाणुं स्पृशन् सर्वेण सर्वं स्पृशति। कालतः परमाणुर्जघन्येनैकं समयम्, उत्कर्षतोऽसङ्ख्येयं कालम्। एवं यावदनन्तप्रदेशिकः।

एकप्रदेशावगाढः सकम्पः पुद्गलस्तस्मिन्नन्यस्मिन् वा स्थाने कालतः जघन्येनैकं समयम्, उत्कृष्टत आवलिकाया असङ्ख्येयभागं यावद् भवति। एवं यावदसङ्ख्येयप्रदेशावगाढः। निष्कम्पस्तु

जघन्येनैकं समयं यावत्, उत्कृष्टतस्त्व-सङ्ख्येयकालं यावत्। एवं यावद-सङ्ख्येयप्रदेशावगाढः।

एकगुणकालकः पुद्गलो जघन्येनैकं समयम्, उत्कर्षेणासङ्ख्येयकालम्। एवं यावदनन्तगुणकालकः। एवं वर्णादीना-श्रित्यापि। एवं सूक्ष्मपरिणतपुद्गलः। एवं बादरपरिणतः पुद्गलः। शब्दपरिणतः पुद्गलः कालतो जघन्येनैकं समयम्, उत्कृष्टत आवलिकाया असङ्ख्येयभागम्। अशब्दपरिणतो यथैकगुणकालकः।

परमाणुपुद्गलस्यान्तरं जघन्यत एकं समयम्, उत्कृष्टतोऽसङ्ख्येयकालम्। द्वि-प्रदेशिकस्य जघन्यत एकं समयम्, उत्कृष्टतोऽनन्तं कालम्। एवं यावदनन्त-प्रदेशिकः। एकप्रदेशावगाढस्य सकम्पस्य पुद्गलस्यान्तरं जघन्येनैकं समयं यावत्। उत्कृष्टतोऽसङ्ख्येयकालम्। एवं यावद-सङ्ख्येयप्रदेशावगाढः। निष्कम्पस्य तु जघन्यत एकं समयम्, उत्कृष्टत आवलि-काया असङ्ख्येयभागम्। एवं यावदस-ङ्ख्येयप्रदेशावगाढः। वर्ण-गन्ध-रस-

स्पर्श-सूक्ष्मपरिणत-बादरपरिणतानां यः स्थितिकालस्तदेवान्तरमपि। शब्दपरिणतस्यान्तरं जघन्येनैकं समयं यावत्, उत्कृष्टतोऽसङ्ख्येयकालम्। अशब्दपरिणतस्य जघन्येनैकं समयमुत्कृष्टत आवलिकाया असङ्ख्येयभागम्।

सर्वस्तोकं क्षेत्रस्थानायुः, अवगाहनास्थानायुरसङ्ख्येयगुणम्, द्रव्यस्थानायुरसङ्ख्येयगुणम्, भावस्थानायुरसङ्ख्यगुणम्।

सारम्भाः सपरिग्रहाश्च नरकादिचतुर्गतिगता जीवाः।

पञ्च हेतवः प्रज्ञप्ताः - हेतुं (१) जानाति (२) पश्यति (३) बुध्यति (४) अभिसमागच्छति (५) छद्मस्थमरणं म्रियते।

पञ्च हेतवः - हेतुना न जानाति यावद्धेतुनाऽज्ञानमरणं म्रियते।

पञ्च अहेतवः - अहेतुं जानाति यावदहेतुं केवलिमरणं म्रियते।

॥५-८॥

सर्वस्तोकाः पुद्गला भावादेशेना-

प्रदेशाः, कालादेशेनाप्रदेशा असङ्ख्येय-गुणाः, द्रव्यादेशेनाप्रदेशा असङ्ख्येयगुणाः क्षेत्रादेशेनाप्रदेशा असङ्ख्येयगुणाः, क्षेत्रा-देशेन सप्रदेशा असङ्ख्येयगुणाः। द्रव्या-देशेन सप्रदेशा विशेषाधिकाः, कालादेशेन सप्रदेशा विशेषाधिकाः।

जीवा न वर्द्धन्ते, नापि हीयन्ते, किन्त्वस्थिताः सर्वकालम्। नारका जघन्ये-नैकं समयं वर्धन्ते। उत्कृष्टत आवलिकाया असङ्ख्येयभागम्। एवं हीयन्तेऽपि। अवस्थितास्तु ते जघन्येनैकं समयम्,

उत्कृष्टतश्चतुर्विंशतिर्मुहूर्त्तानि।

| पृथ्वी | उत्कृष्टतोऽवस्थिता |
|---|---|
| रत्नप्रभा | ४८ मुहूर्त्तानि |
| शर्कराप्रभा | १४ रात्रिदिवसाः |
| वालुकाप्रभा | १ मासः |
| पङ्कप्रभा | २ मासौ |
| धूमप्रभा | ४ मासाः |
| तमा | ८ मासाः |
| तमस्तमा | १२ मासाः |

असुरकुमाराणां वृद्ध्यादि नारकवत्। अवस्थानं जघन्यत एकं समयम्,

उत्कृष्टतोऽष्टचत्वारिंशन्मुहूर्त्तानि। एकेन्द्रियाणां वृद्धिहान्यवस्थानानि जघन्येनैकं समयम्, उत्कृष्टत आवलिकाया असङ्ख्येयभागम्। द्वीन्द्रियवृद्ध्यादि तथैव। अवस्थानं जघन्येनैकं समयम्, उत्कृष्टतोऽन्तार्मुहूर्त्तद्वयम्। एवं यावच्चतुरिन्द्रियाः। शेषाणां वृद्ध्यादि तथैव। अवस्थाने त्वयं विशेषः।

| जीवाः | उत्कृष्टतोऽवस्थानम् |
|---|---|
| सम्मूर्च्छिमपञ्चेन्द्रिय-तिर्यग्योनयः | अन्तर्मुहूर्त्तद्वयम् |

| जीवाः | उत्कृष्टतोऽवस्थानम् |
|---|---|
| गर्भजपञ्चेन्द्रियतिर्यञ्चः | २४ मुहूर्त्तानि |
| सम्मूर्च्छिममनुष्याः | ४८ मुहूर्त्तानि |
| गर्भजमनुष्याः | २४ मुहूर्त्तानि |
| वानमन्तर-ज्योतिः-सौधर्मेशानसुराः | ४८ मुहूर्त्तानि |
| सनत्कुमारसुराः | १८ दिना : + ४० मुहूर्त्तानि |
| माहेन्द्रदेवाः | २४ दिनाः + २० मुहूर्त्तानि |
| ब्रह्मलोकसुराः | ४५ दिनाः |
| लान्तकसुराः | ९० दिनाः |

| जीवाः | उत्कृष्टतोऽवस्थानम् |
|---|---|
| महाशुक्रसुराः | १६० दिनाः |
| सहस्रारसुराः | २०० दिनाः |
| आनत-प्राणतसुराः | सङ्ख्येया मासाः |
| आरणा-ऽच्युतसुराः | सङ्ख्येया वर्षाः |
| ग्रैवेयकसुराः | सङ्ख्येया वर्षाः |
| सर्वार्थसिद्धसुराः | पल्योपमा-सङ्ख्येयभागः |

सिद्धानां वृद्धिर्जघन्येनैकं समयम्। उत्कृष्टतोऽष्टसमयान्। अवस्थानं जघन्येनैकं समयम्, उत्कृष्टतः षण्मासान्।

एवं वृद्ध्याद्यनुसृत्य सोपचयादिप्ररूपणाऽपि वाच्या।

॥५-९॥

दिवसे शुभाः पुद्गलाः, शुभः पुद्गलपरिणामः। रात्रावशुभाः पुद्गलाः, अशुभपुद्गलपरिणामः। नारकाणामशुभपुद्गलत्वेनान्धकारः। असुरादेः शुभपुद्गलत्वेनोद्योतः। एकेन्द्रियादीनां त्रीन्द्रियान्तानां नारकवत्। चतुरिन्द्रियाणां शुभाशुभाः पुद्गलाः, अतस्तेषामुद्योतोऽपि, अन्धकारोऽपि। एवं यावन्मनुष्याः।

| देवाः | भेदाः |
|---|---|
| १ भवनपतयः | १० |
| २ वानमन्तराः | ८ |
| ३ ज्योतिष्काः | ५ |
| ४ वैमानिकाः | २ |

॥५-१०॥

चन्द्रोदयादिवक्तव्यता प्रथमोद्देशवन्नेया।

॥६-१॥

यो महावेदनः, स महानिर्जरः। यो महानिर्जरः, स महावेदनः। महावेदना-

ल्पावेदनयोर्यः श्रेयान् स प्रशस्तनिर्जराकः।

न सम्प्रगाढवेदनां वेदयन्तोऽपि नारका महानिर्जराः, गाढबद्धकर्मत्वात्। श्रमणास्तु यत्किञ्चिद्वेदनामपि वेदयन्तो महानिर्जराः, शिथिलीकृतकर्मत्वात्।

करणचतुष्कम् - मनःकरणम्, वचः-करणम्, कायकरणम्, कर्मकरणञ्च। पञ्चे-न्द्रियाणां चतुष्टयम्। विकलानां त्रिकम्। द्विकं त्वेकेन्द्रियाणाम्।

प्रतिमाप्रतिपन्नोऽनगारो महावेदनो महानिर्जरः। षष्ठीसप्तमीपृथ्वीनारका महा-

वेदना अल्पनिर्जराः शैलेषीप्रतिपन्नोऽ-नगारोऽल्पवेदनो महानिर्जरः। अनुत्तरोप-पातिकदेवा अल्पवेदना अल्पनिर्जराः।

॥६-२॥

आहारवक्तव्यता प्रज्ञापनावन्नेया।

॥६-३॥

महाकर्मणो महाक्रियस्य महाश्रवस्य सर्वतो बन्धनादिभावमापद्यन्ते पुद्गलाः, परिणमन्ति च दुरूपादितयाऽप्रियत्वेन दुःखत्वेन च। एवमल्पकर्मत्वादिगुणयुतस्य विपरीतमपि ज्ञेयम्।

वस्त्रस्य पुद्गलोपचयः प्रयोगतो विस्र-सातश्च, जीवस्य तु कर्मोपचयः, प्रयोगत एव, न विस्रसातः। स च प्रयोगः मनो-वाक्कायसत्कतया त्रिधा।

वस्त्रस्य पुद्गलोपचयः सादिसान्तः। जीवेषु - इर्यापथिकीबन्धकस्य सादिसान्तः, भव्यस्यानादिसान्तः, अभव्यस्यानाद्यनन्तः, न तु कस्यचित्साद्यनन्तः। जीवा नारकादयो गतिरागतिः प्रतीत्य सादिसान्ताः। सिद्धा गतिं प्रतीत्य साद्यनन्ताः। भव्या लब्धिं प्रतीत्यानादिसान्ताः। अभव्याः संसारं प्रतीत्यानाद्यनन्ताः ॥६-४॥

| कर्मप्रकृतिः | स्थितिः | | अबाधा |
| --- | --- | --- | --- |
| | जघन्या | उत्कृष्टा | |
| ज्ञानावरणीयम् | अन्तर्मुहूर्त्तम् | ३० सागरकोटाकोट्यः | ३००० वर्षाणि |
| दर्शनावरणीयम् | अन्तर्मुहूर्त्तम् | ३० सागरकोटाकोट्यः | ३००० वर्षाणि |
| वेदनीयम् | २ समयाः | ३० सागरकोटाकोट्यः | ३००० वर्षाणि |
| मोहनीयम् | अन्तर्मुहूर्त्तम् | ७० सागरकोटाकोट्यः | ७००० वर्षाणि |
| आयुष्यम् | अन्तर्मुहूर्त्तम् | ३३ सागरोपमाः + पूर्वकोटित्रिभागः | पूर्वकोटि-त्रिभागः |
| नाम | ८ मुहूर्त्तानि | २० सागरकोटाकोट्यः | २००० वर्षाणि |
| अन्तरायिकम् | अन्तर्मुहूर्त्तम् | ३० सागरकोटाकोट्यः | ३००० वर्षाणि |

| जीवाः | अल्पबहुत्वम् |
|---|---|
| पुरुषवेदकाः | सर्वस्तोकाः |
| स्त्रीवेदकाः | सङ्ख्येयगुणाः |
| अवेदकाः | अनन्तगुणाः |
| नपुंसकवेदकाः | अनन्तगुणाः |

जीवाः कालादेशेन नियमात् सप्रदेशाः। नैरयिकास्तु स्यात् सप्रदेशाः, स्यादप्रदेशाः। (एकसमय- स्थितिसद्भावात्।)

जीवा वैमानिकाश्च प्रत्याख्याननिर्वर्तितायुष्काः, अप्रत्याख्याननिर्वर्तितायु-

ष्काः, प्रत्याख्यानाप्रत्याख्याननिर्वर्तितायु-
ष्काश्च। शेषा अप्रत्याख्याननिर्वर्तितायुष्काः ॥६-५॥

तमस्कायस्याप्कायपरिणामता, सर्वथैवाप्रकाशकत्वात्। स च जम्बूद्वीपस्य बहिस्तात् तिर्यगसङ्ख्येयद्वीपसमुद्रानि व्यतिव्रज्यारुणवरद्वीपबाह्यवेदिकान्तादरुणोदकसागरं द्विचत्वारिंशद्योजनसहस्राण्यवगाह्योपरितनजलान्तादेकप्रदेशिक्या श्रेण्याऽत्र तमस्कायः समुत्थितः। स च १७२१ योजनान्युदूर्ध्वमुत्पत्य पश्चात्तिर्यक् प्रविस्त-

रन् कल्पचतुष्कमावृत्योद्ध्वमपि यावद् ब्रह्मलोके कल्पे रिष्टविमानप्रस्तटं सम्प्राप्तः। स चाधो मल्लकमूलसंस्थितः, उपरि कुक्कुट-कपञ्जरसंस्थितः। यो देवस्तिसृभिश्चप्पुटि-काभिः २१ कृत्वः जम्बूद्वीपं प्रदक्षि-णीकुर्यात्, सोऽपि तद्गत्या षण्मासान् यावद् व्यतिव्रजन्नासङ्ख्येययोजनमानमेनं व्यतिव्रजेत्। सम्मूर्च्छत्यत्रोदारा बलाहकाः, वर्षन्ति च। अस्ति तत्र बादरस्स्तनितशब्दो विद्युच्च। सर्वमप्येतद्देवासुरनागकृतमव-सेयम्। सर्वे जीवाः पृथ्वीकायिकतया

यावत्त्रसकायिकतया चोत्पन्नपूर्वास्तम-स्कायेऽसकृदथवाऽनन्तकृत्वः, न तु बादर-पृथ्वीकायिकतया वा बादराग्निकायिकतया वा।

अष्टौ कृष्णराजयः। ताश्च ब्रह्मलोका-दधस्ताद्रिष्टविमानप्रस्तटे यथा व्यवस्थिताः। तत्र देवकृतं वृष्ट्यादि भवति। पृथ्वी-परिणामा जीवपरिणामाः पुद्गलपरिणामाश्च ताः। तदवकाशान्तरेषु चाष्टसु अर्चिप्रभृत्यष्ट लोकान्तिकविमानानि, तेषु च सारस्वतादि देवनिवासः। अष्टसागरास्तेषां स्थितिः।

वायुप्रतिष्ठितानि तद्विमानानि। तेभ्योऽ-
सङ्ख्येययोजनसहस्राण्यबाधया च
लोकान्तः।

॥६-६॥

सप्त पृथ्व्यादिवक्तव्यता नेया।

॥६-७॥

शाल्यादियोनिस्थितिः - जघन्येनान्तर्मुहूर्त्तम्, उत्कृष्टतः संवत्सरत्रयम्। कलायादियोनिस्थितिः-जघन्यतोऽन्तर्मुहूर्त्तम्, उत्कृष्टतः संवत्सरपञ्चकम्। अतसीप्रभृतियोनिस्थितिः जघन्या सैव, उत्कृष्टतः संवत्सरसप्तकम्।

| कालः | प्रमाणः |
|---|---|
| आवलिका | असङ्ख्येयसमयाः |
| उच्छ्वासः | सङ्ख्येयावलिका |
| निःश्वास | सङ्ख्येयावलिका |
| प्राणः | नीरुज उच्छ्वासनिःश्वासौ |
| स्तोकः | ७ प्राणाः |
| लवः | ७ स्तोकाः |
| मुहूर्त्तम् | ७७ लवाः/३७७३ प्राणाः |
| अहोरात्रम् | ३० मुहूर्त्तानि |
| पक्षः | १५ अहोरात्राणि |
| मासः | २ पक्षौ |
| ऋतुः | २ मासाः |

| कालः | प्रमाणः |
|---|---|
| अयनम् | ३ ऋतवः |
| संवत्सरः | २ अयने |
| युगः | ५ संवत्सराः |
| वर्षशतम् | २० युगाः |
| वर्षसहस्रम् | १० वर्षशतानि |
| वर्षलक्षम् | १०० वर्षसहस्राणि |
| पूर्वाङ्गम् | ८४ वर्षलक्षाणि |
| पूर्वम् | ८४ पूर्वाङ्गलक्षाणि |

एवं यावत् शीर्षप्रहेलिका। एतावान् गणितविषयः, ततः परमौपम्यम्। तच्च द्विविधं पल्योपमम्, सागरोपमं च। अत्र त्रसरेणुप्रभृतिपरिमाणतो योजननिष्पत्तिः,

पल्योपमादिनिरूपणम्, षडरप्ररूपणा च वाच्या।

॥६-८॥

नरकेषु देवलोकेष्वपि भवन्ति जलधरा देवकृताः। षड्विध आयुर्बन्धः - (१) जातिनामनिधत्तायुः (२) गतिनामनिधत्तायुः (३) स्थितिनामनिधत्तायुः (४) अवगाहनानामनिधत्तायुः (५) प्रदेशनामनिधत्तायुः (६) अनुभागनामनिधत्तायुः।

लवणसमुद्र उच्छ्रितोदकः क्षुभितजलश्च। एवं जीवाभिगमवन्नेयम्।

यावन्तो लोके शुभनामधेयानि, एतावन्तो द्वीपसागरा नामधेयैः प्रज्ञप्ताः। यावन्त सार्धद्वयसागरोपमानामुद्धारसमया-स्तावन्तो द्वीपसमुद्राः। उत्पन्नपूर्वाः सर्व-जीवा द्वीपसमुद्रेषु पृथ्व्यादितयाऽसकृद-थवाऽनन्तकृत्वः।

॥६-९॥

ज्ञानावरणीयं बध्नन् स्यात् सप्तविध-बन्धकोऽष्टविधबन्धकः षड्विधबन्धको वा। प्रज्ञापनागतबन्धोद्देशो नेयः।

॥६-१०॥

नैरयिको नियमाज्जीवः, जीवः पुनर्नैरयिकोऽनैरयिको वा। जीवति तावन्नियमाज्जीवः। जीवः पुनः स्याज्जीवति, स्यान्न जीवति।

नैरयिका आत्मशरीरावगाढान् पुद्गलानाहारयन्ति, नानन्तरक्षेत्रावगाढान्, नापि परम्परक्षेत्रावगाढान्। एवं यावद्वैमानिकाः।

॥७-१॥

श्रमणादिं प्रासुकैषणीयाशनादिना प्रतिलाभयन् श्रमणोपासकस्तस्य समाधिकारकः सन् तमेव समाधिं प्रतिलभते।

प्रतिलाभयंश्च स जीवितं (अन्नादिरूपं) त्यजति, दुस्त्यजं त्यजति, दुष्करं करोति, दुर्लभं लभते, बोधिं बुध्यति, ततः पश्चात् सिध्यति यावदन्तं करोति।

अकर्मणो गतिः - (१) निस्सङ्गतया (२) नीरागतया (३) गतिपरिणामेन, मृल्लेपसङ्गमुक्तालाबुगतिवत्। (४) बन्धनच्छेदनतया, एरण्डफलस्येव। (५) निरिन्धनतया, धूमस्येव। (६) पूर्वप्रयोगेण, बाणस्येव।

यस्य क्रोधादयो व्यवच्छिन्नाः तस्ये-

र्यापथिकीक्रिया। यस्य तु तेऽव्यवच्छिन्नाः, तस्य साम्परायिकी। यथासूत्रं चरत इर्यापथिकी। उत्सूत्रं चरतस्तु साम्परायिकी।

रागेण साङ्गारे पानभोजने। द्वेषेण सधूमे। गुणोत्पादनार्थमन्यद्रव्येण सह संयोजनेन संयोजनादोषदुष्टे। एतद्वैपरीत्याच्च वीताङ्गारे वीतधूमे संयोजनादोषविप्रमुक्ते च पानभोजने।

अनुद्गते सूर्ये प्रतिगृहीतमाहारादि क्षेत्रातिक्रान्तम्। प्रथमपौरुष्यां प्रतिगृहीतं-पश्चिमपौरुष्यां कालातिक्रान्तम्। अर्ध-

योजनव्यतिक्रान्तं मार्गातिक्रान्तम्। द्वात्रिंशत्कवलेभ्योऽधिकं प्रमाणातिक्रान्तम्। द्वात्रिंशत्कवलेभ्य एकमपि ग्रासं न्यूनमाहारयन् श्रमणो 'न प्रकामरसभोजी' - इति वाच्यस्स्यात्।

यो निर्ग्रन्थो निर्ग्रन्थी वा निक्षिप्तशस्त्रमुसलो व्यपगतमालाविलेपनो जीवविप्रमुक्तमकृतमकारितमसङ्कल्पितमनाहूतमक्रीतकृतमनुद्दिष्टं नवकोटिपरिशुद्धं दशदोषविप्रमुक्तमुद्गमोत्पादनेषणासुपरिशुद्धं वीताङ्गारं वीतधूमं संयोजनादोषवि-

प्रमुक्तमसुरसुरमचवचवमद्रुतमविलम्बित-मपरिशाटि अक्षोपाञ्जनव्रणानुलेपभूतं संयमयात्रामात्रवृत्तिकं संयमभारवहनार्थं बिलमिव पन्नगभूतेनात्मनाऽऽहारमाहारयति। एष शस्त्रातीतस्य शस्त्रपरिणामितस्यैषिकस्य व्येषिकस्य सामुदानिकस्य पानभोजनयोरर्थः।

॥७-२॥

अज्ञातजीवादिस्वरूपस्य प्रत्याख्यानं दुःप्रत्याख्यानम्। स हि मृषावाद्यसंवृत एकान्तदण्ड एकान्तबालश्च। एतदितरस्ये-

तरवक्तव्यता नेया।

- प्रत्याख्यानम्
  - मूलगुणप्र०
    - सर्वमूल०
      - पञ्चविधम्
      - सर्वतः प्राणातिपात विरमणादि
    - देशमूल०
      - पञ्चविधम्
      - स्थूलतः प्राणातिपात विरमणादि
  - उत्तरगुणप्र०
    - सर्वोत्तर०
      - दशविधम्
      - अनागतादि
    - देशोत्तरः
      - सप्ततिबधम्
      - दिग्व्रतादि

| जीवाः | अल्पबहुत्वम् |
|---|---|
| मूलगुणप्रत्याख्यानिनः | सर्वस्तोकाः |
| उत्तरगुणप्रत्याख्यानिनः | असङ्ख्येयगुणाः |
| अप्रत्याख्यानिनः | अनन्तगुणाः |

जीवाः स्याच्छाश्वताः स्यादशाश्वताः। द्रव्यार्थतया शाश्वताः, भावार्थतयाऽ-शाश्वताः।

॥७-३॥

प्रावृषि वनस्पतिकायिकाः सर्वमहाऽऽहारकाः, तदनन्तरं च शरदि, ततो हेमन्ते, ततो वसन्ते, ततः सर्वाल्पाहारका

ग्रीष्मे। एवं सत्यपि ग्रीष्मे तत्पुष्पितादिभावो बहूनामुष्णयोनिकजीवानां पुद्गलानां च वनस्पतिकायिकतयोत्पादः।

आलुकमूलकशृङ्गबेरादयोऽनन्तजीवाः। या वेदना सा निर्जरा न भवति कर्मवेदना नोकर्मनिर्जरा।

॥७-४॥७-५॥

संसारिजीवभेदादिवक्तव्यता जीवाभिगमवन्नेया।

॥७-६॥

यस्य नारकेषूत्पादो भविष्यति, स

इहगतोऽल्पमहदन्यतरवेदनस्स्यात्, उत्पद्य-
मानोऽप्येवम्। उत्पन्नस्त्वेकान्तदुःखरूपां
वेदयति वेदनाम्, कदाचिदेव सुखरूपाम्।
एतद्विपर्यासाद्देववेदना ज्ञेया। शेषेषूत्पन्नानां
विशेषः, उभयरूपवेदनावेदकत्वात्, इह-
गतत्वादि त्वेषां नारकवत्।

अनाभोगनिर्वर्तितायुष्का भवन्ति
जीवाः। हिंसादिना रौद्रदुःखवेदनीयानि
क्रियन्ते कर्माणि। अपराणि च तद्विरम-
णादिना। सातवेदनीयकर्महेतवः प्राणानुक-
म्पादयः। असातवेदनीयकर्महेतवः पर-

दुःखोत्पादनादीनि।

जम्बूद्वीपे भरतवर्ष एतदवसर्पिण्यां दुःषमदुःषमायामुत्तमकाष्ठाप्राप्तायां हाहा-भूतः कोलाहलभूतश्च भविष्यति कालः। भविष्यन्ति भयङ्करवात-क्षारमेघादिकृता उपद्रवाः। ऋक्षत्वात्समयस्य मोक्ष्यतः चन्द्रावधिकं शीतम्, अधिकं च तपिष्यतः सूर्यौ। भविष्यति त्रसानां वृक्षादीनां च विध्वंसः। भविष्यत्यङ्गारादिभूता धूलि-पङ्कादिबहुला दुर्निष्क्रमा च भूमिः।

मनुष्याः कुत्सितवर्णादिमन्तोऽकार्य-

नित्योद्यता अत्यन्तनिर्गुणाश्च भविष्यन्ति। उत्कृष्टतो रत्निप्रमाणा षोडश-विंशतिवर्ष-परमायुष्का गङ्गासिन्धुनद्योर्वैताढ्यपर्वत-स्य च निश्रया बिलवासिनो भविष्यन्ति। खादयिष्यन्ति मत्स्यकच्छपान्। गमिष्यन्ति च प्रायो नरकतिर्यग्योनिषु। एवं तत्कालीनसिंहादीनामपि गतिर्ज्ञेया।

॥७-७॥

कामा द्विविधाः - शब्दा रूपाश्च। भोगास्त्रिविधाः- गन्धा रसाः स्पर्शाश्च।

| जीवाः | अल्पबहुत्वम् |
| --- | --- |
| कामभोगिनः | सर्वस्तोकाः |
| नोकामिनो भोगिनः | अनन्तगुणाः |
| भोगिनः | अनन्तगुणाः |

एकेन्द्रिया अन्धा मूढा निबिडतमःप्रविष्टा अज्ञानप्रत्ययां वेदनां वेदयन्ति। सञ्ज्ञिनोऽप्यभिलाषातिरेकापूर्त्या प्रकामनिकरणवेदनां वेदयन्ति।

॥७-८॥

हस्तिनः कुन्थोश्च सम एव जीवः। कृतक्रियमाणकरिष्यमाणान्यतरं सर्वमपि पापकर्म दुःखम्, निर्जीर्णं तु सुखम्।

दशसञ्ज्ञाः - आहारादयः। नारकाणां दशवेदनाः - शीतादयः। हस्तिनः कुन्थोश्च समैवाप्रत्याख्यानक्रिया।

॥७-९॥

महाशिलाकण्टके सङ्ग्रामेऽजयद्वि-देहपुत्रः, नवमल्लकिनवलेच्छकिगणराजानः पराजिताः। तत्र शक्रः कूणिकस्य पुरत एकं महदभेद्यकवचं वज्रप्रतिरूपकं विकुर्व्य तिष्ठति, एवमिन्द्रद्वयं युध्यति देवेन्द्रो मनुष्येन्द्रश्च। एकहस्तिनाऽप्यलं कूणिकः पराजयं कर्त्तुम्। तत्र ह्यश्वादयस्तृणादिनाऽपि

यं घ्नन्ति स 'महाशिलयाऽहमभिहतः' - इति मन्यते, अतोऽसौ महाशिलासङ्ग्राम उच्यते। हतास्तत्र ८४ लक्षजनाः। उत्पन्नाश्च प्रायो नरकतिर्यग्योनिषु।

रथमुशलसङ्ग्रामे विशेषः चमरेन्द्रोऽपि पृष्ठत एकं महदायसं वंशमयभाजनाकारं वस्तु विकुर्व्य तिष्ठति। तत्र ह्येकोऽनश्वसारथिरनारोहको रथः समुसलः प्रभूतजनक्षयं रुधिरकर्दमं च कुर्वन् सर्वतः समन्तात् परिधावति स्म, अतोऽसौ रथमुशलसङ्ग्राम उच्यते। हतास्तत्र ९६

लक्षजनाः। तेषु दशसाहस्त्र्य एकमत्सी-
कुक्षावुत्पन्नाः। एक देवलोके, एकश्च सुकुल
उत्पन्नः। शेषाः प्रायो नरकतिर्यग्योनिषू-
त्पन्नाः। कूणिकसाहाय्यदानं च शक्रस्य
पूर्वसङ्गतिकत्वात्, चमरेन्द्रस्य च पर्याय-
सङ्गतिकत्वात्।

तत्र सङ्ग्रामे वरुणनामा श्रमणोपासको
गाढप्रहारीकृतः सन् सर्वप्राणातिपातादि
प्रत्याख्याय समाधिना कालगतः। तत्प्रिय-
मित्रोऽप्येवं गाढप्रहारीकृतः सन्- मन्मित्र
प्रतिपन्नव्रतादीनि मम सन्तु- इति प्रपद्य

कालगतः। तत्र च यथासन्निहितैर्देवैर्दिव्य-सुरभिगन्धादिवृष्टिः कृता, दिव्यगीतादिनिनादश्च कृतः। एतद्विलोक्य कथयन्ति लोका यत् - सङ्ग्रामेष्वभिमुखा एव प्रहताः सन्तः कालं कृत्वाऽन्यतरेषु देवलोकेषूत्पद्यन्ते - इति।

वरुणः सौधर्मेऽरुणाभे विमाने पल्योपमचतुष्कायुष्कतयोत्पन्नः, ततश्च्युत्वा सेत्स्यति विदेहे। तन्मित्रमुत्पन्नं सुकुले। ततोऽपि सेत्स्यति विदेहे।

॥७-१०॥

यथा मनोज्ञमपि विषसम्मिश्रं भोजन-मापातमात्रभद्रकम्, दुरन्तत्वात्, एवं जीवानां प्राणातिपाताद्यपि। यथा मनोज्ञ-मौषधसम्मिश्रं भोजनमापाते न भद्रकम् परिणम्यमानं तु सुन्दरं भवति, एवं जीवानां प्राणातिपातविरमणादि।

अग्निकायमुज्ज्वालकस्य महाकर्म-त्वम्, बहुतरपृथ्व्यादिसमारम्भकत्वात्। निर्वापयतस्त्वल्पकर्मत्वम्, अल्पतर पृथ्व्यादिसमारम्भकत्वात्।

क्रुद्धस्यानगारस्य तेजोलेश्या निःसृष्टा

सती यत्र पतति, तत्राचित्ता अपि पुद्गला प्रभासन्ते।

॥८-१॥

| पुद्गलाः | अल्पबहुत्वम् |
| --- | --- |
| प्रयोगपरिणताः | सर्वस्तोकाः |
| मिश्रपरिणताः | अनन्तगुणाः |
| विस्रसापरिणताः | अनन्तगुणाः |

॥८-२॥

द्विविधा आशीविषाः - जातिआशीविषाः कर्माशीविषाश्च। आद्याश्चतुर्धा -

(१) वृश्चिकजात्याशीविषः - अर्धभरत-प्रमाणशरीरं विषपरिणतं कर्तुं समर्थः। (२) मण्डूकजात्याशीविषः - भरतप्रमाण० (३) उरगजात्याशीविषः - जम्बूद्वीपप्रमाण० (४) मनुष्यजात्याशीविषः - समयक्षेत्र-प्रमाण०।

कर्म्माशीविषास्त्रिविधाः - (१) तिर्यग्योनिककर्माशीविषः (२) मनुष्य-कर्माशीविषः (३) देवकर्माशीविषः। तेषु सहस्रारान्ता अपर्याप्ता देवाः पूर्वभाव-तस्तत्त्वेनोच्यन्ते।

छद्मस्थो दश स्थानानि सर्वभावेन न जानाति न पश्यति - (१) धर्मास्तिकायम् (२) अधर्मा० (३) आकाशा० (४) परमाणुम् (५) जीवमशरीरप्रतिबद्धम् (६) शब्दम् (७) गन्धम् (८) वातम् (९) अयं जिनो भविष्यति वा न वा (१०) अयं सर्वदुःखान्तकरो भविष्यति वा न वा।

एतान्येव जानाति केवली दश स्थानानि धर्मास्तिकायादीनि।

ज्ञानं पञ्चधा - आभिनिबोधिकादि। आभिनिबोधिकं चतुर्धा - अवग्रहादि। एवं

राजप्रश्नीयवन्नेयम्। नन्दीवदज्ञानभेदादि च।

दशविधा लब्धिः - (१) ज्ञानलब्धिः (२) दर्शनलब्धिः (३) चारित्रलब्धिः (४) चारित्रा-चारित्रलब्धिः (५) दानलब्धिः (६) लाभलब्धिः (७) भोगलब्धिः (८) उपभोगलब्धिः (९) वीर्यलब्धिः (१०) इन्द्रियलब्धिः।

| **ज्ञानाज्ञानपर्यवाः** | **अल्पबहुत्वम्** |
| --- | --- |
| मनःपर्यवज्ञानपर्यवाः | सर्वस्तोकाः |
| विभङ्गज्ञानपर्यवाः | अनन्तगुणाः |
| अवधिज्ञानपर्यवाः | अनन्तगुणाः |

| ज्ञानाज्ञानपर्यवाः | अल्पबहुत्वम् |
| --- | --- |
| श्रुताज्ञानपर्यवाः | अनन्तगुणाः |
| श्रुतज्ञानपर्यवाः | विशेषाधिकाः |
| मत्यज्ञानपर्यवाः | अनन्तगुणाः |
| आभिनिबोधिकज्ञानपर्यवाः | विशेषाधिकाः |
| केवलज्ञानपर्यवाः | अनन्तगुणाः |

॥८-३॥

त्रिविधा वृक्षाः - (१) सङ्ख्येयजीविकाः- तालतमालादयः (२) असङ्ख्येयजीविकाः → द्विधा (१) एकास्थिकाः - निम्बादयः (२) बहुबीजकाः -

यथा प्रज्ञापनायाम् (३) अनन्तजीविकाः -
- आलुकादयः।

कूर्म्मादिस्तच्छ्रेण्यादेर्द्विधा वा त्रिधा वा सङ्ख्येयधा वाऽपि छिन्नत्वे तदन्तराण्यपि तज्जीवप्रदेशैः स्पृष्टानि भवन्ति। न तु तेषु शस्त्रं सङ्क्रामति।

॥८-४॥

क्रियाः पञ्च। क्रियापदं नेयम्।

॥८-५॥

श्रमणोपासकस्य त्रिविधत्रिविधादिना

१४७ भङ्गाः प्राणातिपातादिप्रत्याख्याने भवन्ति।

आजीविकसमयस्यायमर्थः - असंयता सर्वसत्त्वाः, ततो हननादि कृत्वाऽऽहारं कुर्वन्ति।

आजीविकोपासका द्वादश-तालादयः। ते च गोशालकदेवताकाः, उदुम्बरादिफलपञ्चकत्यागिनः, लशुनादिकन्दमूलविवर्जका अवर्द्धितकैरनस्तितैर्गोभिर्वृत्तिं कल्पयन्तो विहरन्ति।

एतेऽपि तावदेवं धर्ममिच्छन्ति। तदा

श्रमणोपासकास्तु सुतरां धर्मिणः, कृतादि-भिरङ्गारकर्मादिपञ्चदशकर्मादानवर्जकत्वात्। एते श्रमणोपासकाः शुक्लाः शुक्लाभि-जात्या भूत्वाऽन्यतरेषु देवलोकेषु देवत्वे-नोत्पद्यन्ते।

॥८-६॥

श्रमणोपासकस्य तथारूपश्रमणादिं प्रासुकैषणीयाशनादिना प्रतिलाभयत एकान्तेन निर्जरा क्रियते, न तु पापकर्म। अप्रासुकानेषणीयाशनादिना तु प्रतिला-भयतो बहुतरा निर्जरा, अल्पतरं पापकर्म।

असंयताविरताप्रतिहतप्रत्याख्यातपापकर्माणं तु प्रासुकैषणीयैरितरैर्वाऽपि प्रतिलाभयत एकान्तेन पापकर्म, न काऽपि निर्जरा।

यदि श्रमणाय प्रतिलाभयन् गृही वदेत् - गृहाणेदं पिण्डद्वयम्। एकमात्मना भुङ्क्ष्व, द्वितीयं स्थविरेभ्यो ददस्व। तदा तेन तत् पिण्डं गृहीत्वा स्थविरा गवेषितव्याः। तदप्राप्तौ परिष्ठापनीयः स पिण्डः, न त्वात्मना भोज्य, नाप्यन्यस्य दातव्यः। एवं गुच्छकादीन् प्रतीत्यापि ज्ञेयम्।

भिक्षार्थं गतेन श्रमणेनान्यतरमकृत्य-स्थानं प्रतिसेवितम्, तस्यालोचनादिकरणोद्यतस्यास्य कदाचित् स्थविरादिमरणादि-हेतुनाऽऽलोचनादि न स्यात्, तदाप्य-सावाराधकः। एवं बहिस्ताद् विहारभूमिं गतं प्रतीत्य, ग्रामानुग्रामं व्रजन्तं प्रतीत्य, श्रमणीं प्रतीत्यापि वाच्यम्। तदाराधकता च छिद्यमानस्य छिन्नत्वात्।

॥८-७॥

गतिप्रवादः पञ्चधा → (१) प्रयोग-गतिः (२) ततगतिः (३) बन्धनछेदनगतिः

(४) उपपातगतिः (५) विहायोगतिः। प्रयोगपदं वाच्यम्।

॥८-८॥

| कं प्रतीत्य | प्रत्यनीकत्रयम् |
|---|---|
| गुरुम् | आचार्यप्र०, उपाध्यायप्र० स्थविरप्र० |
| गतिम् | इहलोकप्र०, परलोकप्र० उभयलो० |
| समूहम् | कुलप्र० गणप्र० सङ्घ० |
| अनुकम्पाम् | तपस्विप्र०, ग्लानप्र० शैक्षप्र० |

| कं प्रतीत्य | प्रत्यनीकत्रयम् |
| --- | --- |
| श्रुतम् | सूत्रप्र० अर्थप्र० तदुभयप्र० |
| भावम् | ज्ञानप्र० दर्शनप्र० चारित्रप्र० |

व्यवहारः पञ्चविधः - आगम-श्रुत-आज्ञा-धारणा-जीतलक्षणः। यद् विद्यमानं स्यात्, तेन व्यवहारं प्रस्थापयेत्, एवमाज्ञाऽऽराधनयोगात्।

द्वाविंशतिः परीषहाः। कर्मचतुष्टये तेषां समवतारः। (१) ज्ञानावणीये - प्रज्ञाऽज्ञानपरीषहौ (२) वेदनीये - क्षुधादय

एकादश (३) दर्शनमोहनीये- दर्शन-परीषहः, चारित्रमोहनीये - अरत्यादयः सप्त (४) अन्तराये - अलाभपरीषहः।

सर्वत्र सममेवोच्चत्वं भवति सूर्ययोः, तथाप्युदयदौ दूरे मूले च दृश्येते तौ, तल्लेश्याप्रतिघातात्। तावेकयोजनशतमुर्ध्वं तपतः, अष्टादशयोजनशतान्यधस्तपतः, ४७,२६३ २१/६० योजनानि च तिर्यक् तपतः।

॥८-९॥

द्विविधो बन्धः प्रयोगबन्धो विस्रसा-

बन्धश्च। विस्रसाबन्धोऽपि द्विविधःसादिरनादिश्च। अनादिर्धर्माधर्माकाशास्तिकायसत्कतया त्रिविधः। त्रयोऽपि ते कालतः। सर्वकालं भवन्ति।

सादिकस्त्रिविधः - (१) **बन्धनप्रत्ययिकः** परमाण्वादीनां विषमस्निग्धत्वादेर्बन्ध उत्पद्यते। जघन्येनासावेकं समयम्, उत्कृष्टतोऽसङ्ख्येयकालम्।

(२) **भाजनप्रत्ययिकः** - जीर्णसुराप्रभृतेः। जघन्येनान्तर्मुहूर्त्तम्, उत्कृष्टतः सङ्ख्येयकालम्।

(३) **परिणामप्रत्ययिकः** - अभ्रादेः। जघन्येनैकं समयम्। उत्कृष्टतः षण्मासान्।

प्रयोगबन्धस्त्रिविधः → (१) **अनाद्यनन्तो**ऽष्टजीवमध्यप्रदेशानाम्। तत्रापि त्रयाणां त्रयाणामनाद्यनन्तः, शेषाणां सादिसान्तः। (२) **साद्यनन्तः** - सिद्धानाम्।

(३) **सादिसान्तः** → चतुर्धा - (१) **आलापनबन्धः** - तृणभारादेः। जघन्येनान्तर्मुहूर्त्तम्, उत्कृष्टतः सङ्ख्येयकालम्।

(ii) **अल्लियावणबन्धः** → चतुर्धा

(क) **श्लेषणाबन्धः** - घटादेर्मदनादिना बन्धः, जघन्यतोऽन्तर्मुहूर्त्तम्, उत्कृष्टतः सङ्ख्येयं कालम्।

(ख) **उच्चयबन्धः** - तृणराश्यादेरुच्चयेन बन्धः। स्थितिः प्राग्वत्।

(ग) **समुच्चयबन्धः** - प्रासादादीनां श्लेषेण बन्धः, स्थितिः प्राग्वत्।

(घ) **संहननबन्धः** - द्विविधः - देशसर्वाभ्याम्, आद्यः शकटादेः, द्वितीयः क्षीरोदकादीनाम्।

(३) **शरीरबन्धः** - द्विविधः - (१)

**पूर्वप्रयोगप्रत्ययिकः** - वेदनादिना समुद्धन्यमानानां जीवप्रदेशानाम्।

(२) **प्रत्युत्पन्नप्रयोगप्रत्ययिकः** - केवलिसमुद्धाते तैजसकार्मणशरीराणाम्।

(४) **शरीरप्रयोगबन्धः** - पञ्चधा-औदारिकादिः।

| **जीवाः** | **अल्पबहुत्वम्** |
|---|---|
| आहारकशरीरसर्वबन्धकाः | सर्वस्तोकाः |
| आहारकशरीरदेशबन्धकाः | सङ्ख्येयगुणाः |
| वैक्रियशरीरसर्वबन्धकाः | असङ्ख्येयगुणाः |
| वैक्रियशरीरदेशबन्धका | असङ्ख्येयगुणाः |

| जीवाः | अल्पबहुत्वम् |
|---|---|
| तैजसकार्मणाबन्धकाः | अनन्तगुणाः |
| औदारिकशरीरसर्वबन्धकाः | असङ्ख्येयगुणाः |
| औदारिकशरीरअबन्धकाः | विशेषाधिकाः |
| औदारिकशरीरदेशबन्धकाः | असङ्ख्येयगुणाः |
| तैजसकार्मणदेशबन्धकाः | विशेषाधिकाः |
| वैक्रियशरीराबन्धकाः | विशेषाधिकाः |
| आहारकशरीराबन्धकाः | विशेषाधिकाः |

| कार्मणशरीरम् | प्रयोगबन्धहेतवः |
|---|---|
| ज्ञानावरणीयम् | ज्ञानप्रत्यनीकतादयः |
| दर्शनावरणीयम् | दर्शनप्रत्यनीकतादयः |
| सातवेदनीयम् | प्राणानुकम्पादयः |
| असातवेदनीयम् | परदुःखोत्पादनादयः |

| जीवाः | अल्पबहुत्वम् |
|---|---|
| मोहनीयम् | तीव्रक्रोधादयः |
| नैरयिकायुः | महारम्भादयः |
| तिर्यगायुः | मायित्वादयः |
| मनुष्यायुः | प्रकृतिभद्रकतादयः |
| देवायुः | सरागसंयमादयः |
| शुभनाम | कायर्जुकतादयः |
| अशुभनाम | कायानृजुकतादयः |
| उच्चगोत्रम् | जात्याद्यमदाः |
| नीचगोत्रम् | जात्यादिमदाः |
| अन्तरायम् | दानाद्यन्तरायाः |

॥८-१०॥

पुरुषचतुष्कम्

| शीलवान् | अशीलवान् | शीलवान् | अशीलवान् |
|---|---|---|---|
| अश्रुतवान् | श्रुतवान् | श्रुतवान् | अश्रुतवान् |
| देशाराधकः | देशविराधकः | सर्वाराधकः | सर्वविराधकः |

॥ १३९ ॥

# आराधनात्रयम्

- ज्ञानाराधना
  - उत्कृष्टा — तेनैव भवेन सिद्धिः द्वितीयेन वा।
  - मध्यमा — द्वितीयेन तृतीयेन वा।
  - जघन्या — तृतीयेन सप्ताष्ट-भवग्रहणानि नातिक्रामति ।
- दर्शनाराधना
  - उत्कृष्टा
  - मध्यमा
  - जघन्या
- चारित्राधना
  - उत्कृ०
  - मध्य०
  - जघ०

(दर्शनाराधना, चारित्राधना) ज्ञानाराधनावत् ।

पुद्गलपरिणामः पञ्चविधः - वर्ण-गन्ध-रस-स्पर्श-संस्थानरूपः। एवं वर्णादावपि कालवर्णपरिणामादयो वाच्याः। असङ्ख्येया लोकाकाशप्रदेशाः, एकजीवस्य च। ज्ञानावरणीयादिकर्मणोऽविभागपरिच्छेदा अनन्ताः।

प्रत्येकजीवस्य प्रत्येकजीवप्रदेशो ज्ञानावरणीयादेः कर्मणोऽविभागपरिच्छेदैः स्यादावेष्टितपरिवेष्टितः स्यान्नावेष्टितपरिवेष्टितः। यद्यावेष्टितपरिवेष्टितस्तदा नियमादनन्तैः।

॥९-१॥

जम्बूद्वीपसंस्थानादिवक्तव्यता जम्बूद्वीपप्रज्ञप्तितो नेया।

॥९-२॥

चन्द्रसङ्ख्यादिवक्तव्यता जीवाभिगमवन्नेया।

॥९-३-३०॥

अन्तर्द्वीपवक्तव्यता जीवाभिगमवन्नेया।

॥९-३१॥

ज्ञानावरणीयक्षयोपशमेनाश्रुत्वाऽपि धर्मं लभेत श्रोतुम्। एवं दर्शनमोहनीयादि-क्षयोपशमेन बोध्यादिलाभोऽपि वाच्यः।

॥९-३२॥

असुरकुमाराद्युत्पत्तिः सान्तरमपि निरन्तरमपि, एकेन्द्रियाणां निरन्तरमेव। एवं उद्वर्त्तनाऽपि वाच्या।

| **नरकगतिः** | **अल्पबहुत्वम्** |
| --- | --- |
| तमस्तमापृथ्वीनैरयिकप्रवेशनकम् | सर्वस्तोकम् |
| तमापृ० | असङ्ख्येयगुणम् |
| एवं यावद् रत्नप्रभापृ० | असङ्ख्येयगुणम् |

| तिर्यग्गतिः | अल्पबहुत्वम् |
|---|---|
| पञ्चेन्द्रियतिर्यग्योनिकप्रवेशनकम् | सर्वस्तोकम् |
| चतुरिन्द्रियति० | विशेषाधिकः |
| एवं यावदेकेन्द्रियति० | विशेषाधिकः |

| मनुष्यगतिः | अल्पबहुत्वम् |
|---|---|
| गर्भव्युत्क्रान्तिकमनुष्य-प्रवेशनकम् | सर्वस्तोकम् |
| सम्मूर्च्छिमम० | असङ्ख्येयगुणम् |

| देवगतिः | अल्पबहुत्वम् |
|---|---|
| वैमानिकदेवप्रवेशनकम् | सर्वस्तोकम् |
| भवनवासिदे० | असङ्ख्येयगुणम् |
| वानमन्तरदे० | असङ्ख्येयगुणम् |
| ज्योतिष्कदे० | असङ्ख्येयगुणम् |

| गतिचतुष्कम् | अल्पबहुत्वम् |
|---|---|
| मनुष्यप्रवेशनकम् | सर्वस्तोकम् |
| नैरयिकप्रवेशनकम् | असङ्ख्येयगुणम् |
| देवप्रवेशनकम् | असङ्ख्येयगुणम् |
| तिर्यग्योनिकप्रवेशनकम् | असङ्ख्येयगुणम् |

॥९-३३॥

ब्राह्मणकुण्डग्रामे श्रीवीरसमवसरणम्, ऋषभदत्तदेवानन्दाऽऽगमनम्, देवानन्दाप्रस्रवः, श्रीगौतमपृच्छा, श्रीवीरसद्भावख्यापनम्, देशना, उभयप्रव्रज्या, एकादशाङ्गाध्ययनम्, बहुतपश्चर्याः, मासिकानशनेन मुक्तिश्च।

क्षत्रियकुण्डनगरतो जमालिक्षत्रिय-कुमारागमनम्, देशनाश्रवणम्, मातापित्र-न्तिके प्रव्रज्यानुमतियाचनम्, स्वजन-शरीर-कामभोग-धनसत्कप्रलोभनानाम-पाकरणम्, संयमदुष्करत्वश्रुत्या-ऽप्यवि-चलितत्वम्, प्रव्रज्योत्सवः, पञ्चशतपुरुषैः सह दीक्षा, एकादशाङ्गाध्ययनम्, विचित्रतपश्चर्याभिरात्मभावनम्, पञ्चश्रमण-शतैः सह पृथग्विहारानुज्ञायाञ्चा, भगवतो मौनम्, पृथग्विहारः, अरसाद्याहारतो जमाले रोगोदयः, संस्तारककरणमाश्रित्य क्रियमाणं

न कृतमिति मिथ्याप्रतिपत्तिः। केषाञ्चित्तद-श्रद्धधानानां भगवत उपसम्पदा। अन्यदा विहृत्य भगवदग्रे जमालेः स्वजिनत्व-ख्यापनम् श्रीगौतमस्वामिभिर्लोकशाश्वत-त्वादिप्रश्नाभ्यां तन्निरुत्तरीकरणम्, भगवता सद्भावकथनम्, जमालेस्तदश्रद्धा, विहारः, असद्भावोद्भावनाभिः स्वपरोभयव्युद्ग्रा-हणम्, पाक्षिकानशनम्, लान्तककल्पे १३ सागरस्थितिककिल्बिषदेवतयोत्पादः, आचार्यादिप्रत्यनीकत्वात्। स च चत्वारि पञ्च तिर्यग्योनिक-मनुष्य-देवभवग्रहणानि

संसारमनुपरिवर्त्त्य सेत्स्यति।

॥९-३४॥

पृथ्वीकायिकः पृथ्वीकायमेवोच्छ्वासादिगोचरीकरोति, एवमप्कायादीनप्यसावुच्छ्वा-सादिगोचरीकुरुते। एवमप्कायिककृतोच्छ्वासादिमाश्रित्यापि वाच्यम्। एतच्चोच्छ्वासादि कुर्वन् स त्रिचतुःपञ्चान्यतरक्रियो भवति।

वायुकायिको वृक्षमूलादेः प्रचालनादि कुर्वन् त्रिचतुःपञ्चान्यतरक्रियो भवति॥

॥१०-१॥

दिशो दश-पूर्वाद्याः। ताश्च जीवा अजीवा एव। ऐन्द्री-इत्यादितन्नामधेयानि।

॥१०-२॥

रुपान्यालोकयतः संवृतस्यानगारस्य साम्परायिकीक्रिया, तदनालोकयत ईर्या-पथिकी।

योनित्रयं वेदनात्रयं च - शीता, उष्णा, शीतोष्णा च।

अन्यतराकृत्यस्थानप्रतिसेविनो भिक्षोरेवं भवति-अहं चरमकालसमय एतस्य

स्थानस्यालोचनादि करिष्यामि- इति। स तस्य स्थानस्यानालोचितप्रतिक्रान्तः कालं करोति, नास्ति तस्याऽऽराधना।

॥१०-३॥

देव आत्मर्द्ध्या चत्वारि पञ्च देवावासान्तराणि व्यतिक्रान्तः, तेन परं परर्द्ध्या। अल्पर्द्धिको देवो महर्द्धिकस्य मध्यंमध्येन न व्यतिव्रजेत्। समर्द्धिकोऽपि न समर्द्धिकस्य, प्रमत्तं तु व्यतिव्रजेत्। स पूर्वं महिकादिव्यामोहं कृत्वा पश्चाद् व्यतिव्रजेत्। महर्द्धिकस्त्वल्पर्द्धिकमध्येन विमोह्यान्यथा

वापि व्यतिव्रजेत्। एवं देवीं प्रतीत्यापि वाच्यम्।

धावमानस्याश्वस्य हृदययकृतोर्मध्ये कर्कटको नाम वायुः सम्मूर्च्छति, तेन 'खु खु' इतिशब्दो भवति।

स्थास्याम इत्यादिः प्रज्ञापनी भाषा, न मृषा। एवं आमन्त्रण्यादावपि ज्ञेयम्, निरवद्यपुरुषार्थसाधनरूपायास्तद्भावानपायात्।

॥१०-४॥

चमरेन्द्रत्रायस्त्रिंशदेवाः पूर्वभवे काकन्दीनगरे त्रयस्त्रिंशत् श्रमणोपासकाः,

पूर्वमुग्रविहारिणः, पश्चादवसन्नविहारिणः पाक्षिकानशनेनानालोचितप्रतिक्रान्ताः कालं कृत्वा तत्त्वेनोत्पन्नाः। अपि चैतच्छाश्वतं नामधेयं तद्देवानाम्। अन्ये च्यवन्ति, अन्ये चोत्पद्यन्ते। एवं बलीन्द्रत्रायस्त्रिंशा अपि ज्ञेयाः, विशेषः-बिभेलसन्निवेशगा बभूवुस्ते - इति। एवं धरणादेरपि। शक्रादित्रायस्त्रिंशानां विशेषः - पश्चादप्युग्रविहारिणः, मासिकानशनकृतः, आलोचितप्रतिक्रान्ताश्चेति। एवं यावदच्युतस्य।

॥१०-५॥

चमरेन्द्रग्रमहिष्यः पञ्च - काल्यादयः। प्रत्येकाया अष्टसहस्रदेव्यः परिवारः प्रत्येकाऽष्टदेवीसहस्रविकुर्वणासमर्था। एवं ४०००० देव्यः, एतत्समुदायः तुडिकः। न चमरेन्द्रस्तेन सह सुधर्म्मासभायां भोगान् भुङ्क्ते, तत्रस्थजिनसक्थ्याशातनाभयात्। एवं सोमादिलोकपालान् बलीन्द्रादींश्चाश्रित्यापि यथायोगं वाच्यं यावदीशानेन्द्रम्।

॥१०-६॥

शक्रसभादिवक्तव्यता राजप्रश्नीयवत्,

अन्तर्द्वीपवक्तव्यता च जीवाभिगमवन्नेया।

॥११-१॥

एकपत्रकमुत्पलमेकजीवम्। ततः परं येऽनेकजीवा उत्पद्यन्ते तेऽनेकजीवाः। ते जीवा नरकवर्जगतित्रयादुत्पद्यन्ते। एकेन समयेन त एकादयो यावदसङ्ख्येया उत्पद्यन्ते। प्रतिसमयमपह्रियमाणा असङ्ख्येयास्तेऽसङ्ख्योत्सर्पिण्यवसर्पिणीभिरपह्रियन्ते। तदवगाहना जघन्यतोऽङ्गुलासङ्ख्येयभागः, उत्कृष्टतः साधिकयोजनसहस्रम्।

स उत्पलजीव इति कालतो जघन्यतोऽन्तर्मुहूर्त्तम्, उत्कृष्टतोऽसङ्ख्येयकालं भवति। स 'पृथ्वीजीवः' पुनरपि 'उत्पलजीवः' एवं भवादेशेन भवग्रहणद्वयं यावज्जघन्यतः, उत्कृष्टतोऽसङ्ख्येयभवग्रहणानि यावद् गतिरागतिः कुर्यात्। एवं अप्कायिकादितयाऽपि वाच्यम्। कालादेशेन जघन्यतोऽन्तर्मुहूर्त्तद्वयम्, उत्कृष्टतोऽसङ्ख्येयकालम्। वनस्पतितया तूत्कृष्टतोऽनन्तभवग्रहणान्यनन्तं कालं यावद् गतिरागतिः कुर्यात्।

॥ १५५ ॥

द्वीन्द्रियादितयोत्कृष्टतः सङ्ख्येयभव-ग्रहणानि सङ्ख्येयकालम्। पञ्चेन्द्रियतया गतिरागतिरुत्कृष्टतोऽष्टभवग्रहणानि पूर्व-कोटिपृथक्त्वम्।

उत्पलजीवस्थितिर्जघन्येनान्तर्मुहूर्त्तम्। उत्कृष्टतो दशवर्षसहस्राणि। सर्वे जीवा-ऽसकृदथवाऽनन्तकृत्व उत्पलमूलादितयो-त्पन्नपूर्वाः।

॥११-२-८॥

एवं शालुकादीन् प्रतीत्यापि यथायोगं वाच्यम्।

॥११-९॥

हस्तिनापुरराज्ञः शिवस्य दिक्प्रोक्षित-तापसदीक्षा, नित्यषष्ठतपआतापनापरायणता, पारणके कन्दाद्यशनमग्निहोमश्च, विभङ्गज्ञानोत्पत्त्या सप्तद्वीपसागरदर्शन-सञ्जातमिथ्याप्रतिपत्तिः, श्रीगौतमपृच्छा, भगवता सद्भावज्ञापनम्, लोकपरम्परा-ज्ञाततद्भावस्य शिवराजर्षेर्विभङ्गज्ञान-प्रतिपातः, भगवदुपासनाभिलाषः, देशना-श्रवणम्, प्रव्रज्या, ऋषभदत्तवन्मोक्षः।

सिध्यमाना वज्रर्षभनाराचसंहनने सि-द्धन्ति। एवमौपपातिकवत् सिद्धदण्डिका वाच्या।

॥११-१०॥

चतुर्विधो लोकः - द्रव्यादिभेदात्। क्षेत्रलोकस्त्रिधा - (१) अधोलोकः - तप्राकारसंस्थितः (२) तिर्यग्लोकः - झल्ल-रिसंस्थितः (३) उर्ध्वलोकः - उर्ध्व-मृदङ्गाकारसंस्थितः।

जम्बूद्वीपमन्दरचूलिकागताः षड् देवा जम्बूद्वीपस्य चतुर्ष्वपि दिक्षु बहिस्तान्मुखं

कृत्वा दिक्कुमारीमहत्तरिकाचतुष्कमेककाल एव बलिं क्षिपेत्। प्रत्येकश्च देवः समर्थस्तद्बलिमप्राप्तभूमिमेव ग्रहीतुम्। ते देवा दिक्षट्के तया गत्या प्रस्थिताः। तत्समये वर्षसहस्रायुर्बालः प्रजातः, तस्यासप्तममपि कुलं प्रहीनम्, नामापि तस्य प्रहीनम्। नैतावताऽपि ते देवा लोकान्तं प्राप्ताः। तेषां गतादगतमसङ्ख्येयभागम्।

एवमलोकमानमपि वाच्यम्। विशेषः - मानुषोत्तरपर्वते बहिर्मुख्यो दिक्कुमारीमहत्तरिका अष्ट। दश देवाश्च

प्रस्थिता दशदिक्षु। बालश्च वर्षलक्षायुः। गतादगतमनन्तगुणम्।

| | | |
|---|---|---|
| जघन्यपदे | एकस्मिनाकाशप्रदेशे जीवप्रदेशाः | सर्वस्तोकाः |
| सर्वजीवाः | | असङ्ख्येय गुणाः |
| उत्कृष्टपदे | एकस्मिनाकाशप्रदेशे जीवप्रदेशाः | विशेषाधिकाः |

॥११-११॥


कालः
प्रमाणकालः
दिवसप्र०
उत्कृ०
आषाढपूर्णिमा
रात्रिप्र०
उत्कृ०
पोषपूर्णिमा
१८ मुहूर्त्तानि
यथायुर्निर्वृतिकालः
नारकादिना निर्वर्तितं यथायुः
मरणकालः
जीवः शरीरात् शरीरं वा जीवाद् वियुज्यते सः
अध्वकालः
समयाद्यर्थ-तयाऽनेक-विधः यावत् सागरोपमम्

किमस्ति पल्योपमसागरोपमयोः क्षय इति सुदर्शनश्रेष्ठिपृच्छायां श्रीवीरोक्ततत्पूर्वभवः → हस्तिनापुरराजा बलः, प्रभावतीदेवी, सिंहस्वप्नम्, महाबलकुमारजन्म, यावदष्टराजकन्यापरिणयः, देववद् भोगसुखानुभवः, विमलजिनसन्तानीयधर्मघोषाणगारदेशनाश्रुतिः, प्रव्रज्यानुज्ञायाञ्चा, एकदिवसराज्यश्रीदर्शनपितृकाङ्क्षापूर्तिः, प्रवज्या, चतुर्दशपूर्वाध्ययनम्, द्वादशवर्षश्रामण्यपालनम्, मासिकानशनेन ब्रह्मलोक उत्पादः, दशसागरोपमस्थितिः। स च

त्वमेव तत्स्थितिक्षयादत्राऽऽगतः, अतोऽस्ति पल्योपमसागरोपमयोः क्षयः।

एतच्छ्रुतेः सुदर्शनस्य जातिस्मरणम्, प्रव्रज्या, चतुर्दशपूर्वाध्ययनम्, द्वादशवर्षश्रामण्यपर्यायान्ते सिद्धिश्च।

॥११-१२॥

पुद्गलपरिव्राजकस्य विभङ्गज्ञानोत्पादः, ब्रह्मलोकदर्शनेन मिथ्याप्रतिपत्तिः, श्रीवीरेण तन्निरासः, प्रव्रज्या, शिवराजर्षिवन्मुक्तिश्च।

॥१२-१॥

जागरिका त्रिविधा - (१) **बुद्ध-जागरिका** - अर्हताम् (२) **अबुद्धजागरिका** - अनगाराणाम् (३) **सुदक्खु-जागरिका** - श्रमणोपासकानाम्।

॥१२-२॥

भवसिद्धिकत्वं स्वभावतः, न परिणामतः। सर्वेऽपि भवसिद्धिकाः सेत्स्यन्ति। न त्वेवमपि तच्छून्यता भविष्यति लोकस्य। भावनीयमत्र सर्वाकाशश्रेणि-निदर्शनम्। धर्मिणां जागरिकता साध्वी,

अधर्मिणां तु सुप्तता। एवं धर्मिणां बलित्वं दक्षत्वं च साधु, अधर्मिणां तु दुर्बलत्व-मदक्षत्वं च। स्वप्रश्नोत्तरत्वेनैतज्ज्ञात्वा जयन्तीश्राविका प्रव्रज्य सिद्धा।

॥१२-३॥

प्रथमा पृथ्वी नाम्ना घम्मा गोत्रेण रत्नप्रभा, एवं जीवाभिगमवन्नेयम्।

॥१२-४॥

पुद्गलपरावर्त्तः सप्तविधः - (१) औदारिकपु० (२) वैक्रियपु० (३) तेजःपु०

(४) कर्मपु० (५) मनःपु० (६) वचः पु० (७) आनप्राणपु०। प्रत्येकोऽप्येषोऽनन्तोत्सर्पिण्यवसर्पिणीभिर्निर्वर्त्यते। सर्वजीवानामपि सर्वेऽपि पुद्गलपरावर्त्ता अनन्ता व्यतीताः।

| **पुद्गलपरावर्त्तनिर्वर्तनाकालः** | **अल्पबहुत्वम्** |
|---|---|
| कर्मपु० | सर्वस्तोकः |
| तेजःपु० | अनन्तगुणः |
| औदारिकपु० | अनन्तगुणः |
| आनप्राणपु० | अनन्तगुणः |
| मनःपु० | अनन्तगुणः |
| वचःपु० | अनन्तगुणः |
| वैक्रियपु० | अनन्तगुणः |

| पुद्गलपरावर्त्ताः | अल्पबहुत्वम् |
| --- | --- |
| वैक्रियपु० | सर्वस्तोकाः |
| वचःपु० | अनन्तगुणाः |
| मनःपु० | अनन्तगुणाः |
| आनप्राणपु० | अनन्तगुणाः |
| औदारिकपु० | अनन्तगुणाः |
| तेजःपु० | अनन्तगुणाः |
| कर्मपु० | अनन्तगुणाः |

॥१२-६॥

प्राणातिपातादयः पञ्चवर्णाः पञ्चरसाश्चतुःस्पर्शा द्विगन्धाः। तद्विरमणादयस्तु वर्णादिशून्याः। तनुवात-पृथ्वीसप्तक-सौधर्मादि कल्प-ईषत्प्राग्भारा-नैरयिकादिदेह-

पुद्गलास्तिकायाः प्राणातिपातवत्। नैरयिकादिशरीराणि कार्मणं प्रतीत्य तु चतुःस्पर्शाणि।

द्रव्यलेश्या प्राणातिपातवत्। भावलेश्या वर्णादिशून्या, मनोवाग्योगौ चतुःस्पर्शौ। सम्यग्दृष्ट्यादयः, चक्षुःदर्शनादीनि, मतिज्ञानादीनि, आहारसञ्ज्ञादयः, अतीताद्यध्वानश्च वर्णादिशून्याः।

॥१२-६॥

राहुदेवस्य शृङ्गाटकादीनि नवनामधेयानि। कृष्णादिपञ्चवर्णानि च तद्वि-

मानानि। यदा राहुर्गमनागमने विकुर्वणां परिचारणां वा कुर्वन् चन्द्रलेश्याऽऽवरणादि करोति, तदा लोकश्चन्द्रस्य ग्रहणादि कृतमनेनेति मन्यते।

द्विविधो राहुः - (१) ध्रुवराहुः - तिथिपरावर्त्तहेतुः (२) पर्वराहुः - ग्रहण-हेतुः।

चन्द्रस्य देवदेवीशयनाद्युपकरणदेह-विमानानां कान्तत्वात्स 'सश्रीः' इत्युच्यते। समयादेरादिः सूर्याद् भवति, अतोऽ-सावादित्य इत्युच्यते।

॥१२-७॥

असङ्ख्येययोजनकोटाकोटिमितोऽयं लोकः, नात्र परमाणुपुद्गलमात्रोऽपि स प्रदेशः, यत्र न जातो मृतो वाऽयं जीवः, शाश्वतत्वाल्लोकस्य, अनादित्वात्संसारस्य, नित्यत्वाज्जीवस्य, बहुत्वात्कर्मणः, बाहुल्याच्च जन्ममरणानाम्।

अत एव चतुरशीतिलक्षनरकावासेष्वपि सर्वे जीवा असकृदथवाऽनन्तकृत्वः, पृथ्वीकायिकादितया नारकतया चोत्पन्नपूर्वाः। एवमनुत्तरदेवस्थानानि यावत् सर्वे-

ष्वपि वाच्यम्। नवरमनुत्तरेषु देवतयोत्पादो न वाच्यः।

अयं जीवः सर्वजीवानां माता-पितृ-भ्रातृ-भगिनी-भार्या-पुत्र-पुत्री-स्नुषातया-ऽप्यसकृदथवाऽनन्तकृत्व उत्पन्नपूर्वः। एवं सर्वजीवा अप्यस्य जीवस्य। एवं सर्व-जीवानां मिथः प्रत्यनीकतया राजादितया चोत्पत्तिर्वाच्या।

॥१२-८॥

सम्भवति महर्द्धिकदेवस्य द्विशरीर-नागेषूत्पत्तिः, तत्र तत्पूजासाफल्यम्, तद-

न्तरभवे तत्सिद्धिश्च।

॥१२-९॥

देवाः पञ्चविधाः - (१) भव्यद्रव्य-देवाः - पञ्चेन्द्रियतिर्यग्योनिको मनुष्यो वा देवेषूत्पत्स्यमानः (२) नरदेवाः - चक्रिणः (३) धर्मदेवाः - अनगाराः (४) देवाधि-देवाः - अर्हन्तः (५) भावदेवाः - भवन-पत्यादिसुराः।

| देवाः | स्थितिः | | उत्पादः | अन्तरम् | |
|---|---|---|---|---|---|
| | जघन्या | उत्कृष्टा | | जघन्यतः | उत्कृष्टतः |
| भव्यद्रव्यदेवाः | अन्तर्मुहूर्त्तम् | पल्योपमत्रयम् | देवेषु | १०००० वर्षाणि + अन्तर्मुहूर्त्तम् | अनन्तकालः वनस्पतिकालः |
| नरदेवाः | ७०० वर्षाणि | ८४ लक्ष-पूर्वाणि | नारकेषु | साधिकं सागरोपमम् | देशोनापार्धपु-द्गलपरा० |
| धर्मदेवाः | अन्त-र्मुहूर्त्तम् | देशोना-पूर्वकोटिः | देवेषु | पल्योपम-पृथक्त्वम् | ” |
| देवाधिदेवाः | ७२ वर्षाणि | ८४ लक्ष-पूर्वाणि | सिद्धौ | - | - |
| भावदेवाः | १०००० वर्षाणि | ३३ सागराः | मनुष्येषु तिर्यक्षु वा | अन्तर्मुहूर्त्तम् | वनस्पति-कालः |

| देवाः | अल्पबहुत्वम् |
| --- | --- |
| नरदेवाः | सर्वस्तोकाः |
| देवाधिदेवाः | सङ्ख्येयगुणाः |
| धर्मदेवाः | सङ्ख्येयगुणाः |
| भव्यद्रव्यदेवाः | असङ्ख्येयगुणाः |
| भावदेवाः | असङ्ख्येयगुणाः |

| भावदेवाः | अल्पबहुत्वम् |
| --- | --- |
| अनुत्तरोपपातिकाः | सर्वस्तोकाः |
| उपरितनग्रैवेयकगाः | सङ्ख्येयगुणाः |
| मध्यमग्रैवेयकगाः | सङ्ख्येयगुणाः |
| अधस्तनग्रैवेयकगाः | सङ्ख्येयगुणाः |

| भावदेवाः | अल्पबहुत्वम् |
|---|---|
| अच्युतसुराः | सङ्ख्येयगुणाः |
| एवं यथा जीवाभिगमे | |
| यावज् ज्योतिष्काः | असङ्ख्येयगुणाः |

॥१२-१०॥

आत्माऽष्टविधः द्रव्यात्मादिः।

| आत्मानः | अल्पबहुत्वम् |
|---|---|
| चारित्रात्मानः | सर्वस्तोकाः |
| ज्ञानात्मानः | अनन्तगुणाः |
| कषायात्मानः | अनन्तगुणाः |
| योगात्मानः | विशेषाधिकाः |

| आत्मानः | अल्पबहुत्वम् |
|---|---|
| वीर्यात्मानः | विशेषाधिकाः |
| उपयोगात्मानः | (त्रयोऽपि तुल्याः) |
| द्रव्यात्मानः | |
| दर्शनात्मानः | विशेषाधिकाः |

आत्मा स्याज्ज्ञानम्, स्यादज्ञानम्। ज्ञानं पुनर्नियमादात्मा।

॥१३-१॥

नरकपृथ्वीषु सङ्ख्येयविस्तृतेषु नरकेष्वेकसमय एकादयो यावत् सङ्ख्येया नारका उत्पद्यन्ते। असङ्ख्येयविस्तृतेषु तु

यावदसङ्ख्येयाः।

॥१३-२॥

एवं नरकवदसुरकुमारादावप्युत्पादो वाच्यः।

॥१३-३॥

नैरयिक उपपातक्षेत्रप्राप्तिसमय एवाहारयन्ति, ततः शरीरनिर्वृर्तिं कुर्वन्तीत्यादि परिचारणापदं वाच्यम्।

॥१३-४॥

लोकस्यायाममध्यं रत्नप्रभापृथ्व्या

अवकाशान्तरस्यासङ्ख्येयभागानवगाह्य। अधोलोकस्यायाममध्यं पङ्कप्रभापृथ्व्या अवकाशान्तरस्य सातिरेकमर्द्धमवगाह्य। उर्ध्वलोकस्यायाममध्यम् - ब्रह्मलोकक-ल्पस्याधस्ताद्रिष्टे विमानप्रस्तटे। तिर्यग्लो-कस्यायाममध्यम् - जम्बूद्वीपमन्दरस्य बहु-मध्यदेशभागे रत्नप्रभापृथ्व्या उपरितनाध-स्तनक्षुद्रप्रतरेष्वष्टप्रदेशिको रुचकः। ततः पूर्वादिदशदिक्प्रवर्तनम्। दशापि दिशो-ऽलोकं प्रतीत्यानन्तप्रदेशिकाः, साद्यन-न्ताश्च। लोकं प्रतीत्यासङ्ख्यप्रदेशिकाः,

साद्यन्ताश्च। दिक्चतुष्कं द्विप्रदेशादिकम्, द्विप्रदेशोत्तरम्, लोकं प्रतीत्य मुरज-संस्थिता। अलोकं प्रतीत्य शकटोर्ध्वी-संस्थिता।

विदिक्चतुष्कम् - एकप्रदेशादिकम्, एकप्रदेशविस्तीर्णम्, अनुत्तरम्, छिन्नमुक्ता-वलिसंस्थितं च।

विमला तमा च चतुःप्रदेशादिका, द्विप्रदेशविस्तीर्णा, रुचकसंस्थिता।

पञ्चास्तिकाया लोक इति प्रोच्यते। सुप्रतिष्ठकसंस्थितश्चायम्।

| लोकः | अल्पबहुत्वम् |
| --- | --- |
| तिर्यग्लोकः | सर्वस्तोकः |
| उर्ध्वलोकः | असङ्ख्येयगुणः |
| अधोलोकः | विशेषाधिकः |

॥१३-५॥

नारकाहारवक्तव्यताऽऽहारपदानुसारेण नेया।

॥१३-६॥

वीतभयनगरराजा उदायनः, श्रीवीर-पर्युपासनाभिलाषः, श्रीवीरागमनम्, देश-नाश्रुतिः, प्रव्रज्याभिलाषः, मा भूद्राज्य-

सक्तस्य स्वपुत्रस्याभीचेर्भवभ्रमणमिति स्व-भागिनेयकेशिराज्याभिषेकः, प्रव्रज्या, ऋषभदत्तवत्सिद्धः, अभीचेरवज्ञाशङ्का, कूणिकोपसम्पत्, श्रमणोपासकोऽसौ पाक्षिकानशनेन मृत्वाऽसुरकुमारः पल्योपमायुरुत्पन्नः, उदायनराजर्षिसमनुबद्धवैरत्वात्। ततश्च्युत्वा सेत्स्यत्यसौ विदेहे।

॥१३-७॥

भाषा चतुर्विधा सत्या मृषा सत्यामृषाऽसत्यामृषा। एवं मनोऽपि। कायः सप्तविधः - औदारिकादिः।


मरणम्
आवीचिमरणम्
अवधिमरणम्
आत्यन्तिकम०
बालम०
पण्डितम०
द्र० क्षे० का० भा०
ना० ति० म० दे०
द्रव्यावीचिवत्
चतुर्गतिसत्कं
भेदचतुष्कम्
आवीचिवत्
भेदषोडशकं प्रत्येकम्
द्वादशविधम्
वलन्मरणादि
पादोपगमनम्
भक्तप्रत्याख्यानम्
निर्हारिमम्
अनिर्हारिमम्
नियमादप्रतिकर्म
निर्हारिमम्
अनिर्हारिमम्
नियमात् सप्रतिकर्म

॥१३-८॥

अष्ट कर्मप्रकृतयः। प्रज्ञापनावन्नेयो बन्धस्थित्युद्देशकः।

॥१३-९॥

समर्थो भावितात्मानगारश्चक्रादिरूपं विकुर्व्याऽऽकाश उर्ध्वमुत्पतितुम्।

॥१३-१०॥

छाद्मस्थिकाः समुद्घाताः षट् → वेद-नादयः। प्रज्ञापनावन्नेयम्।

॥१४-१॥

शीघ्रा गति नैरयिकाणाम्, उत्कृष्टतोऽपि त्रिसमयविग्रहेणोत्पद्यमानत्वात्। एवमसुरादेरपि, केवलमेकेन्द्रियाणां चतुःसमयो विग्रहो वाच्यः।

॥१४-२॥

उन्मादो द्विविधः - (१) यक्षावेशेन (२) मोहनीयकर्मोदयेन। आद्यः सुखवेदनतरः सुखविमोचनतरश्च, द्वितीयस्त्वितरः।

वृष्टिं चिकीर्षुः शक्र आभ्यन्तरपर्षद्देवानाहूयति। ते मध्यम०। ते बाह्यप०। ते बाह्यबाह्यदेवानाहूयन्ति। ते आभियोगि-

क०। ते वृष्टिकायिकदे०। ते चाहूताः सन्तः वृष्टिकायं कुर्वन्तिः।

एवमसुरकुमारादयोऽपि वृष्टिं चिकीर्षवः। असुरादीनां वृष्टिकरणमर्हज्जन्मनिष्क्रमणादिमहिमसु। असुरादीनां तमस्कायकरणं क्रीडारत्यर्थम्, प्रत्यनीकविमोहनार्थम्, गोप्यरक्षार्थम्, आत्मशरीरप्रच्छादनार्थं वा भवति।

॥१४-३॥

मायिमिथ्यादृष्टिनो देवा भावितात्मानगारस्य न वन्दनादि कुर्वते, अवज्ञया च

तन्मध्येन व्यतिव्रजन्ति। अपरे तु कुर्वते। न तन्मध्येन व्यतिव्रजन्ति।

॥१४-४॥

परिणामो द्विविधः - जीवपरिणामोऽजीवपरिणामश्च। परिणामपदं वाच्यम्।

॥१४-५॥

देवा अग्निमध्येन व्यतिव्रजेयुः, न तु दह्येरन्, शस्त्रागोचरत्वात्तेषाम्, एवं वैक्रियादिलब्धिमत्तिर्यङ्मनुष्या अपि।

नैरयिका दशस्थानान्यनुभवन्ति -

(१) - (५) अनिष्टाः शब्दादयः (६) अनिष्टा गतिः (७) अनिष्टा स्थितिः (८) अनिष्टं लावण्यम् (९) अनिष्टा यशःकीर्तिः (१०) अनिष्ट उत्थानकर्मबलवीर्यपुरुषकारपराक्रमः।

देवा एतद्विपरीतदशस्थानानि। पृथ्वीकायिकादयः - षट्स्थानानि - (१) इष्टानिष्टाः स्पर्शाः, इष्टानिष्टा गतिः, यावत्पराक्रमः। एवं द्वीन्द्रियादीनां रसाद्याधिक्येन वाच्यम्।

॥१४-६॥

नारकादिजीवाः पुद्गलाहाराः, पुद्गलपरिणामाः, पुद्गलयोनिकाः, पुद्गलस्थितिकाः, कर्मोपगाः, कर्मनिदानाः, कर्मस्थितिकाः कर्मणैव विपर्यासं यन्ति।

दिव्यभोगेच्छुः शक्रो नेमिप्रतिरूपकं योजनलक्षायामविष्कम्भं प्रासादादिसहितं विकुर्व्य तत्र सपरिवाराग्रमहिषीभिर्नाट्यगन्धर्वानीकद्वयेन च सह दिव्यभोगान् भुङ्क्ते। एवं यावदच्युतेन्द्रं यथायोगं वाच्यम्।

॥१४-७॥

चिरसंस्तुतोऽसि गौतम ! अनन्तरं देवलोके, अनन्तरं मनुष्यभवे, किन्तु मरणानन्तरमितश्च्युता द्वावपि तुल्या भविष्यामः-इति कैवल्याप्राप्तिखेदापगमाय श्रीवीरोक्तिः।

षड्विधं तुल्यकम् - (१) द्रव्यतु० (२) क्षेत्रतु० (३) कालतु० (४) भवतु० (५) भावतु० (६) संस्थानतु० ।

सन्ति लवसप्तमा देवाः, यदि तेषां प्राग्भव एतावदायुरभविष्यत्, तदा ते तेनैव भवग्रहणेन सिद्धिमगमिष्यन्। अनुत्तरोप-

पातिकदेवव्यपदेशस्तेषामनुत्तरशब्दादिमत्त्वात्। यावत्कर्म षष्ठभक्तिकः श्रमणो निर्जरयति, तावत्कर्मावशेषेण ते देवा अनुत्तरोपपातिकत्वेनोत्पन्नाः।

॥१४-८॥

रत्नप्रभादिपृथ्वीनां मिथोऽन्तरम्-असङ्ख्येययोजनसहस्राणि। तमस्तमाया लोकान्तस्य चान्तरम्-तावदेव। रत्नप्रभाया ज्योतिष्कादन्तरम् - ७९० यो०। ज्योतिष्कस्य सौधर्मेशानयोरन्तरम् - असङ्ख्येययोजनानि। एवं यावदनुत्तराणि।

तत इषत्प्राग्भाराया अन्तरम् - १२ यो०।

ततोऽलोकान्तरम् - देशोनं यो०।

वाच्योऽत्रौपपातिकवदम्बडपरिव्राजकव्यतिकरः।

अव्याबाधो देवः पुरुषस्याक्षिपक्ष्मणि दिव्यदेवर्द्धिसहितद्वात्रिंशन्नाट्यविधिमुपदर्शयितुं समर्थः, न च तस्य कापि व्याबाधामुत्पादयेत्। अतः सोऽव्याबाध उच्यते। शक्रः पुरुषस्य शीर्षं छित्त्वा चूर्णीकृत्य कमण्डलौ क्षिप्त्वा ततः क्षिप्रमेव प्रतिसन्धेयत्, न तु तस्य पुरुषस्य काऽपि

पीडामुत्पादयेत्।

जृम्भका देवा नित्यप्रमुदितप्रक्रीडिताः कन्दर्परतिमोहनशीलाश्च। यस्तान् क्रुद्धान् पश्येत्, स महदयशः प्राप्नुयात्। यस्तु तान् तुष्टान् पश्येत्, स प्राप्नुयान् महद्यशः। अतस्ते देवा जृम्भकत्वेन व्यपदिश्यन्ते। ते च दशविधाः - अन्नजृम्भकादयः। सर्व-दीर्घवैताढ्येषु चित्रविचित्रयमकपर्वतेषु काञ्चनपर्वतेषु च तन्निवासः। पल्योपमं च तत्स्थितिः।

॥१४-९॥

प्रकाशयन्ति सरूपिसकर्मलेश्याः पुद्गलाः, चन्द्रसूर्यादिविमानवत्।

महर्द्धिदेवो रूपसहस्रं विकुर्व्य भाषासहस्रं भाषितुं समर्थः। सा चैकैव भाषा, न भाषासहस्रम्।

| श्रमणपर्यायः | तेजोलेश्यातिक्रमः |
|---|---|
| १ मासपर्यायः | वानमन्तराणाम् |
| २ मासपर्यायः | असुरेन्द्रवर्जभवनपतीनाम् |
| ३ मासपर्यायः | असुरकुमाराणाम् |
| ४ मासपर्यायः | ग्रहनक्षत्रताराणाम् |
| ५ मासपर्यायः | चन्द्रसूर्याणाम् |

| श्रमणपर्यायः | तेजोलेश्यातिक्रमः |
|---|---|
| ६ मासपर्यायः | सौधर्मेशानदेवानाम् |
| ७ मासपर्यायः | सनत्कुमारमाहेन्द्रदेवानाम् |
| ८ मासपर्यायः | ब्रह्मलोकलान्तकदेवानाम् |
| ९ मासपर्यायः | महाशुक्रसहस्रारदेवानाम् |
| १० मासपर्यायः | आनतप्राणतारणाच्युतदेवानाम् |
| ११ मासपर्यायः | ग्रैवेयकदेवानाम् |
| १२ मासपर्यायः | अनुत्तरोपपातिकदेवानाम् |

ततोऽपि शुक्लः शुक्लाभिजात्यो भूत्वा सिध्यति।

॥१४-१०॥

तुल्यमेव केवलिनः सिद्धस्य च ज्ञानम्। भाषा तु केवलिन एव, उत्थानादिरहितत्वात्सिद्धानाम्।

॥१५॥

गोशालकचरितं (कल्पवृत्ति-त्रिषष्टि-चरितदशमपर्वाद्यनुसारेण) नेयम्।

॥१६-१॥

वायुकायाद्विना नोज्ज्वलत्यग्निः।

॥१६-२॥

पञ्चविधोऽवग्रहः - (१) देवेन्द्रावग्रहः

(२) राजावग्रह (३) गाथापत्यवग्रहः (४) सागारिकावग्रहः (५) साधर्मिकावग्रहः।

अधुना ये श्रमणा विहरन्ति, तानहमवग्रहमनुजानामीति शक्रोक्तिः। यदा शक्रः सूक्ष्मकायमपोह्य भाषते, तदा सावद्या तद्भाषा, अन्यथा तु निरवद्या।

॥१६-३॥

ज्ञानावरणीयं वेदयन् जीवोऽष्टकर्मप्रकृतिर्वेदयति। प्रज्ञापनागतवेदावेदोद्देशो नेयः।

॥१६-४॥

| | |
|---|---|
| इदृशः श्रमणो यत्कर्म क्षपयति | तदेतावत्कालेनापि नैरयिको न क्षपयति। |
| प्रातर्भोजी | १०० वर्षाणि |
| चतुर्थभक्तिकः | १००० वर्षाणि |
| षष्ठभक्तिकः | १,००,००० वर्षाणि |
| अष्टमभक्तिकः | १,००,००,००० वर्षाणि |
| दशमभक्तिकः | वर्षकोटाकोटिः |

॥१६-५॥

गङ्गदत्तदेवस्य महाशुक्रादागमनम्, तत्तेजोऽसहिष्णुशक्रस्य सङ्क्षिप्तप्रश्नवन्दन-पूर्वकं प्रतिगमनम्, गङ्गदत्तदेवशङ्का-

निरासः, देशना, तत्पूर्वभवकथा, मुनिसुव्रतजिनान्तिके प्रव्रज्या, ११ अङ्गाध्ययनम्, मासिकानशनेन कालं कृत्वा महाशुक्रगमनम्, सप्तदशसागराः स्थितिः, ततश्च्युत्वा सेत्स्यति विदेहे।

॥१६-६॥

पञ्चविधं स्वप्नदर्शनम् - (१) यथातथ्यम् (२) प्रतानम् (३) चिन्तास्वप्नम् (४) तद्विपरीतम् (५) अव्यक्तदर्शनम्। न सुप्तः स्वप्नं पश्यति, नापि जागरः, सुप्तजागरः पश्यति स्वप्नम्।

| जीवाः | विरतिं प्रतीत्य |
|---|---|
| नारकाः | सुप्ताः |
| देवाः | सुप्ताः |
| एकेन्द्रियाः | सुप्ताः |
| विकलेन्द्रियाः | सुप्ताः |
| पञ्चेन्द्रियतिर्यञ्चः | सुप्ताः सुप्तजागराश्च |
| मनुष्याः | सुप्ताः सुप्तजागरा अपि जागरा अपि |

संवृतो यथातथ्यं स्वप्नं पश्यति। असंवृतः संवृतासंवृतश्च तथ्यमतथ्यं वा स्वप्नं पश्यति। द्विचत्वारिंशत्स्वप्नादि-वक्तव्यता श्रीवीरदशस्वप्नवक्तव्यता तुरग-

श्रेण्यादिस्वप्नदर्शनफलानि च (कल्पवृत्त्यनुसारेण) ज्ञातव्यानि।

॥१६-७॥

उपयोगो द्विविधः। उपयोगपदं नेयम्।

॥१६-८॥

गच्छत्येकसमयेन परमाणुर्लोकान्ताल्लोकान्तम्। वर्षा वर्षति वा न वेतिज्ञानार्थं हस्तादि प्रसारयतः पञ्च क्रिया क्रियन्ते। महर्द्धिकदेवो लोकान्ते स्थित्वाऽलोके हस्तादि प्रसारयितुमशक्तः, पुद्गलं प्राप्यैव

जीवाजीवानां गतिसम्भवात्, अलोके च जीवानां पुद्गलानां चाभावः, अतो न तत्र गतिः।

॥१६-९॥

बलीन्द्रस्य रूचकेन्द्रनामोत्पातपर्वतादिवक्तव्यता चमरेन्द्रवन्नेया।

॥१६-१०॥

अवधिर्द्विविधः। अवधिपदं वाच्यम्।

॥१६-११॥

न सर्वे समाहारा द्वीपकुमारा इत्यादि

प्रथमशतवन्नेयम्।

| द्वीपकुमाराः | अल्पबहुत्वम् |
|---|---|
| तेजोलेश्याः | सर्वस्तोकाः |
| कापोतलेश्याः | असङ्ख्यगुणाः |
| नीललेश्याः | विशेषाधिकाः |
| कृष्णलेश्याः | विशेषाधिकाः |

॥१६-१२-१४॥

एवमुदधि-दिक् - स्तनितकुमाराणा-मपि ज्ञेयम्।

॥१७-१॥

उदायी गजराजोऽसुरकुमारेभ्य उत्पन्नः, सागरस्थितिकरत्नप्रभानारकेषूत्पन्नः, ततश्च्युत्वा सेत्स्यति विदेंहे। एवं भूतानन्दगजराजोऽपि।

औदारिकादिशरीरणि श्रोत्रादीन्द्रियाणि मनःप्रभृतियोगांश्च निर्वर्तयन्तो जीवास्त्रिचतुःपञ्चान्यतरक्रिया भवन्ति।

भावो षड्विधः - औदयिको यावत् सान्निपातिकः। अनुयोगद्वारवन्नेयम्।

॥१७-२॥

श्रमणाः पण्डिताः। श्रमणोपासका बालपण्डिताः। येनैकेऽपि प्राणे निक्षिप्तो दण्डः, नासावेकान्तबाल इति वक्तव्यस्स्यात्।

॥१७-३॥

संवेगनिर्वेदादयो यावन्मारणान्तिकाध्यासना सिद्धिपर्यवसानफलाः प्रज्ञप्ताः।

॥१७-४॥

आत्मकृतं जीवानां दुःखं वेदना च, न परकृतमुभयकृतं वा।

॥१७-५॥

ईशानेन्द्रसभादिवर्णनं शक्रवद्यथायोगं ज्ञेयम्।

॥१७-६-७॥

पृथ्वीकायिकस्य समुद्घाताः - वेदना-कषायमरणलक्षणाः। स मारणान्तिक-समुद्घातेन देशेन सर्वेण वा समवहतो भवति। देशेन समवहतः पूर्वं सम्प्राप्य पुद्गलान् पश्चादुत्पद्यते, सर्वेण तु समवहतः पूर्वमुत्पद्य ततः पुद्गलग्रहणं कुर्यात्।

॥१७-८-११॥

एवमप्कायिकादीनपि प्रतीत्य वाच्यम्।

॥१७-१२॥

| एकेन्द्रियाः | अल्पबहुत्वम् |
| --- | --- |
| तेजोलेश्याः | सर्वस्तोकाः |
| कापोतलेश्याः | अनन्तगुणाः |
| नीललेश्याः | विशेषाधिकाः |
| कृष्णलेश्याः | विशेषाधिकाः |

॥१७-१३-१६॥

नागकुमारादीनां समाहारादिवक्तव्यता षोडशशतवन्नेया।

॥१८-१॥

यो भावो येन प्राप्तपूर्वः, स तेनाप्रथमः। अप्राप्तपूर्वेषु भावेषु तु प्रथमः। यथा जीवो जीवत्वेनाप्रथमः। सिद्धः सिद्धत्वेन प्रथमः।

यो यं भावं प्राप्स्यति, स तेनाचरमः। यस्य येन भावेनात्यन्तवियोगः स चरमः। यथा जीवो जीवत्वेनाचरमः। नैरयिक-स्तद्भावेन स्याच्चरमः, स्यादचरमः।

॥१८-२॥

शक्रकृतभगवद्भक्तिः, श्रीगौतमकृत-तत्प्राग्भवपृच्छा, श्रीमुनिसुव्रतजिनदेशना-श्रुतेर्नैगमसहस्रयुतकार्त्तिकश्रेष्ठिदीक्षा, १४ पूर्वाध्ययनम्, मासिकानशनेन कालं कृत्वा शक्रतयोत्पादः। सागरोपमद्वयमायुः प्रति-पाल्यानन्तरभवे सेत्स्यति।

॥१८-३॥

भावितात्मानगारस्य चरमा निर्जरा-पुद्गलाः सर्वमपि लोकमवगाह्य तिष्ठन्ति।

॥१८-४॥

- बन्धः
  - द्रव्यबन्धः
    - प्रयोगबन्धः
      - शिथिलः
      - दृढः
    - विस्रसाबन्धः
      - सादिः
      - अनादिः
  - भावबन्धः
    - मूलप्रकृतिबन्धः
    - उत्तर-प्रकृतिबन्धः

नारकादय आहारतया गृहीतानां पुद्गलानामसङ्ख्येयभागमाहारीकुर्वन्ति, अनन्तभागं च निर्जरयन्ति।

| युग्मानि | चतुष्केनापह्रियमाणस्य पर्यवसानम् |
|---|---|
| कृतयुग्मम् | ४ |
| त्र्योजः | ३ |
| द्वापरयुग्मम् | २ |
| कल्योजः | १ |

| जीवाः | जघन्यपदे | उत्कृष्टपदे | मध्यमपदे |
|---|---|---|---|
| नैरयिकाः | कृतयुग्माः | त्र्योजाः | चतुरन्यतराः |
| असुरादयः | कृतयुग्माः | त्र्योजाः | चतुरन्यतराः |
| वनस्पतयः | - | - | चतुरन्यतराः |
| विकलाः | कृतयुग्माः | द्वापरयुग्माः | चतुरन्यतराः |
| पृथ्व्यादयः | कृतयुग्माः | द्वापरयुग्माः | चतुरन्यतराः |
| पञ्चेन्द्रियतिर्यञ्चः | कृतयुग्माः | त्र्योजाः | चतुरन्यतराः |
| वानमन्तराः | कृतयुग्माः | त्र्योजाः | चतुरन्यतराः |
| ज्योतिष्काः | कृतयुग्माः | त्र्योजाः | चतुरन्यतराः |
| वैमानिकाः | कृतयुग्माः | त्र्योजाः | चतुरन्यतराः |
| सिद्धाः | - | - | चतुरन्यतराः |

| जीवाः | जघन्यपदे | उत्कृष्टपदे | मध्यमपदे |
|---|---|---|---|
| स्त्रियः | कृतयुग्माः | कृतयुग्माः | चतुरन्यतराः |
| असुरादिस्त्रियः | कृतयुग्माः | कृतयुग्माः | चतुरन्यतराः |
| तिर्यक्स्त्रियः | कृतयुग्माः | कृतयुग्माः | चतुरन्यतराः |
| मनुष्यस्त्रियः | कृतयुग्माः | कृतयुग्माः | चतुरन्यतराः |
| वानमन्तरस्त्रियः | कृतयुग्माः | कृतयुग्माः | चतुरन्यतराः |
| ज्योतिष्कस्त्रियः | कृतयुग्माः | कृतयुग्माः | चतुरन्यतराः |
| वैमानिकस्त्रियः | कृतयुग्माः | कृतयुग्माः | चतुरन्यतराः |

॥१८-५॥

मायिमिथ्यादृष्टिर्देव ऋजुकविकुर्वणा-प्रवृत्तो वक्रं विकुर्वति, वक्रविकुर्वणा-प्रवृत्तस्तु ऋजम्। एवं यथाऽसाविच्छति, न तथा विकुर्वति। अमायिसम्यग्दृष्टिर्देवस्तु

यथेच्छति तथा विकुर्वति।

द्रवगुडः

- व्यवहारेण
  - मधुररसोपेतः
- निश्चयेन
  - ५ वर्णः
  - २ गन्धः
  - ५ रसः
  - ८ स्पर्शः

॥१८-६॥

एवं भ्रमरादीन् प्रतीत्य व्यवहारतः कालवर्णादिः निश्चयतस्तूक्तवत्, इत्यादि वाच्यम्।

| पुद्गलः | वर्णः | गन्धः | रसः | स्पर्शः |
|---|---|---|---|---|
| परमाणुः | १ | १ | १ | २ |
| द्विप्रदेशिकः | १/२ | १/२ | १/२ | २/३/४ |
| त्रिप्रदेशिकः | १/२/३ | १/२ | १/२/३ | २/३/४ |
| चतुःप्रदेशिकः | १/२/३/४ | ,, | १/२/३/४ | ,, |
| पञ्चप्रदेशिकः | १/२/३/४/५ | ,, | १/२/३/४/५ | ,, |
| एवं यावदसङ्ख्य-प्रदेशिकः | ,, | ,, | ,, | ,, |
| सूक्ष्मपरिणतोऽनन्त-प्रदेशिकः | ,, | ,, | ,, | ,, |
| बादरपरिणतोऽनन्त-प्रदेशिकः | ,, | ,, | ,, | ४/५/६/७/८ |

॥१८-७॥

| जीवाः | कर्मोपधिः | शरीरोपधिः | बाह्यभाण्डाद्युपधिः |
|---|---|---|---|
| नारकाणाम् | ✓ | ✓ | ✗ |
| एकेन्द्रियवर्ज-जीवानाम् | ✓ | ✓ | ✓ |
| एकेन्द्रियाणाम् | ✓ | ✓ | ✗ |

एवं परिग्रहत्रैविध्यमपि। अन्यथा वोपधिः - सचित्ताचित्तमिश्रभेदात्। प्रणिधानत्रयम्- मनोवाक्कायभेदात्।

अज्ञातादृष्टाश्रुतार्थप्रश्नहेतुप्रश्नव्याकरणान्यतरं बहुजनमध्ये प्रज्ञापयन्नर्हत्तदुक्तधर्मकेवलितदुक्तधर्माणामाशातनावर्त्ती भवति।

देवासुरसङ्ग्रामे देवा यत्किञ्चिदपि

तृणादि गृह्णन्ति, तत्तेषां प्रहरणरत्नतया परिणमति। असुराणां तु नित्यविकुर्वितानि प्रहरणरत्नानि।

| देवाः | अनन्तकर्मक्षपणकालः |
|---|---|
| वानमन्तराः | १०० वर्षाणि |
| असुरवर्जभवनपतयः | २०० वर्षाणि |
| असुराः | ३०० वर्षाणि |
| ग्रहनक्षत्रताराः | ४०० वर्षाणि |
| चन्द्रसूर्याः | ५०० वर्षाणि |
| सौधर्मेशानसुराः | १००० वर्षाणि |
| सनत्कुमारमाहेन्द्रसुराः | २००० वर्षाणि |
| ब्रह्मलोकलान्तकसुराः | ३००० वर्षाणि |

| देवाः | अनन्तकर्मक्षपणकालः |
|---|---|
| महाशुक्रसहस्रारसुराः | ४००० वर्षाणि |
| आनतप्राणतारणाच्युतसुराः | ५००० वर्षाणि |
| अधस्तनग्रैवेयकसुराः | लक्ष वर्षाणि |
| मध्यमग्रैवेयकसुराः | २ लक्ष वर्षाणि |
| उपरितनग्रैवेयकसुराः | ३ लक्ष वर्षाणि |
| विजयादिसुराः | ४ लक्ष वर्षाणि |
| सर्वार्थसुराः | ५ लक्ष वर्षाणि |

॥१८-८॥

परमावधिको मनुष्यः परमाणुं यत्समये जानाति, न तत्समये पश्यति, साकारत्वात्तज्ज्ञानस्य, अनाकारत्वाच्च तद्दर्शनस्य।

||१८-९||

| जीवः | जघन्यस्थितिः | उत्कृष्टस्थितिः |
|---|---|---|
| भव्यद्रव्यनैरयिकाः | अन्तर्मुहूर्त्तम् | पूर्वकोटिः |
| भव्यद्रव्यदेवः | अन्तर्मुहूर्त्तम् | पल्योपमत्रयम् |
| पृथ्वी/अप्/वनस्पतिः | अन्तर्मुहूर्त्तम् | साधिकसागरद्वयम् |
| तेजः ।वायुः | अन्तर्मुहूर्त्तम् | पूर्वकोटिः |
| विकलाः | अन्तर्मुहूर्त्तम् | पूर्वकोटिः |
| पञ्चेन्द्रियतिर्यक् | अन्तर्मुहूर्त्तम् | ३३ सागराः |
| मनुष्यः | अन्तर्मुहूर्त्तम् | ३३ सागराः |

॥१८-१०॥

सोमिलप्रश्नोत्तराणि - या मे तपोनियमसंयमस्वाध्यायादौ यतना सा यात्रा। यापनीयं द्विविधम् (१) इन्द्रिययापनीयम् - श्रोत्रादिवशीकरणम् (२) नोइन्द्रिययापनम् - क्रोधाद्युच्छेदस्तदनुदीरणं च, तन्मेऽव्याबाधम्। यदारामादौ स्त्र्यादिरहितवसतौ प्रासुकैषणीयपीठाद्युपसम्पद्य विहरामि, तन्मे प्रासुकविहारः।

'सरिसवा' भक्ष्याभक्ष्यप्रश्न उत्तरम् - भक्ष्या अपि, अभक्ष्या अपि, यतः


सरिसवा
मित्रसरिसवा
धान्यसरिसवा
सहजातः
सहवर्द्धितकः
सहपांशुक्रीडितः
श्रमणानामभक्ष्याः
शस्त्रपरिणताः
अशस्त्रपरिणताः
अभक्ष्याः
याचिताः
अयाचिताः
अनेषणीयाः
लब्धाः
अलब्धाः
अभक्ष्याः
अभक्ष्याः
भक्ष्याः
अभक्ष्याः

एवं मासा-कुलत्था-गोचरप्रश्नावपि ज्ञेयौ। स्वगोचरैकत्वादिप्रश्नोत्तराणि - द्रव्यार्थतयैकोऽहम्, ज्ञानदर्शनार्थतया द्विविधोऽहम्, प्रदेशार्थतयाऽक्षयोऽप्यहम्, अव्ययोऽप्यहम्, अवस्थितोऽप्यहम्, उपयोगार्थतयानेकभूतभावभव्योऽप्यहम्।

अत्र सम्बुद्धः सोमिलः । श्रावकत्वं प्रपन्नः । सेत्स्यति तृतीयभवे ।

॥१९-१॥

लेश्या षट् । लेश्योद्देशको नेयः ।

||१९-२||

गर्भोद्देशो नेयः ।

||१९-३||

| अवगाहना | अल्पबहुत्वम् |
|---|---|
| अपर्याप्तसूक्ष्मनिगोदजघन्यावगाहना | सर्वस्तोकाः |
| अपर्याप्तसूक्ष्मवायुजघन्यावगाहना | असङ्ख्यगुणा |
| अपर्याप्तसूक्ष्मतेजःजघन्यावगाहना | असङ्ख्यगुणा |
| अपर्याप्तसूक्ष्मअपूजघन्यावगाहना | असङ्ख्यगुणा |
| अपर्याप्तसूक्ष्मपृथ्वीजघन्यावगाहना | असङ्ख्यगुणा |
| अपर्याप्तबादरवायुजघन्यावगाहना | असङ्ख्यगुणा |
| अपर्याप्तबादरतेजःजघन्यावगाहना | असङ्ख्यगुणा |
| अपर्याप्तबादरअप्जघन्यावगाहना | असङ्ख्यगुणा |
| अपर्याप्तबादरपृथ्वीघन्यावगाहना | असङ्ख्यगुणा |
| पर्याप्त / अपर्याप्त } बादरनिगोदजघन्यावगाहना / प्रत्येकशरीरबादरवनस्पतिजघन्यावगाहना | } द्वयोस्तुल्या असङ्ख्यगुणा |

| | |
|---|---|
| पर्याप्तसूक्ष्मनिगोदजघन्यावगाहना | असङ्ख्यगुणा |
| अपर्याप्तसूक्ष्मनिगोदउत्कृष्टावगाहना | विशेषाधिका |
| पर्याप्तसूक्ष्मनिगोदउत्कृष्टावगाहना | विशेषाधिका |
| पर्याप्तसूक्ष्मवायुजघन्यवगाहना | असङ्ख्यगुणा |
| अपर्याप्तसूक्ष्मवायुउत्कृष्टावगाहना | विशेषाधिका |
| पर्याप्तसूक्ष्मवायुउत्कृष्टावगाहना | विशेषाधिका |
| पर्याप्तसूक्ष्मतेजःजघन्यावगाहना | असङ्ख्यगुणा |
| अपर्याप्तसूक्ष्मतेजःउत्कृष्टवगाहना | विशेषाधिका |
| पर्याप्तसूक्ष्मतेजःउत्कृष्टवगाहना | विशेषाधिका |
| पर्याप्तसूक्ष्मअप्जघन्यावगाहना | असङ्ख्यगुणा |
| अपर्याप्तसूक्ष्मअप्उत्कृष्टावगाहना | विशेषाधिका |
| पर्याप्तसूक्ष्मअप्उत्कृष्टावगाहना | विशेषाधिका |
| पर्याप्तसूक्ष्मपृथ्वीजघन्यावगाहना | असङ्ख्यगुणा |
| अपर्याप्तसूक्ष्मपृथ्वीउत्कृष्टावगाहना | विशेषाधिका |
| पर्याप्तसूक्ष्मपृथ्वीउत्कृष्टावगाहना | विशेषाधिका |

| | |
|---|---|
| पर्याप्तबादरवायुजघन्यावगाहना | असङ्ख्येयगुणा |
| अपर्याप्तबादरवायुउत्कृष्टावगाहना | विशेषाधिका |
| पर्याप्तबादरवायुउत्कृष्टावगाहना | विशेषाधिका |
| पर्याप्तबादरतेजःजघन्यावगाहना | असङ्ख्येयगुणा |
| अपर्याप्तबादरतेजःउत्कृष्टावगाहना | विशेषाधिका |
| पर्याप्तबादरतेजःउत्कृष्टावगाहना | विशेषाधिका |
| पर्याप्तबादरअपूजघन्यावगाहना | अस० |
| अपर्याप्तबादरअपूउत्कृष्टावगाहना | विशे० |
| पर्याप्तबादरअपूउत्कृष्टावगाहना | विशे० |
| पर्याप्तबादरपृथ्वीजघन्यावगाहना | असङ्ख्यगुणा |
| अपर्याप्तबादरपृथ्वीउत्कृष्टावगाहना | विशे० |
| पर्याप्तबादरपृथ्वीउत्कृष्टावगाहना | विशे० |
| पर्याप्तबादरनिगोदजघन्यावगाहना | अस० |
| अपर्याप्तबादरनिगोदउत्कृष्टावगाहना | विशे० |
| पर्याप्तबादरनिगोदउत्कृष्टावगाहना | विशे० |

| | |
|---|---|
| पर्याप्तप्रत्येकवनस्पतिजघन्यावगाहना | अस० |
| अपर्याप्तप्रत्येकवनस्पतिउत्कृष्टावगाहना | अस० |
| पर्याप्तप्रत्येकवनस्पतिउत्कृष्टावगाहना | अस० |

चक्रिणश्चन्दनपेषिका बलाद्युपेता तरुणी वज्रमयपेषणशिलायां यावत् २१ कृत्वः पिषेत् । तत्रामुकपृथ्व्यादिजीवानां सङ्घट्टाद्यपि न स्यात् । एवमतिसूक्ष्मा पृथ्वीकायिकस्यावगाहना ।

बलाद्युपेततरुणमुष्टिना मूर्द्धन्यभिहतस्य दुर्बलवृद्धस्य यादृशी वेदना स्यात्, ततोऽप्यनिष्टतरा वेदना पृथ्वीकायिकादेः शक्रान्तस्य सतः स्यात् ।

॥१९-४॥

नैरयिका महाश्रवा महाक्रिया महावेदना अल्पनिर्जराश्च स्युः । देवा महाश्रवा महाक्रिया अल्पवेदना अल्पनिर्जराश्च स्युः । शेषाणां तु सम्भवन्ति षोडशोऽपि भङ्गाः ।

॥१९-५॥

महास्थितिनारका इतरेभ्य महाश्रवादिमन्तो भवन्ति, स्थिति प्रतीत्या एतद्विपरीतं तु देवेषु । शेषा नारकवत् ।

॥१६-६॥

द्वीपसागरवक्तव्यता जीवाभिगमवन्नेया।

॥१९-७॥

| देवाः | वसतयः |
|---|---|
| असुरकुमाराः | ६४ लक्षभवनानि-सर्वरत्नमयानि |
| एवं-यावत् स्तनितकु० | ६४ लक्षभवनानि-सर्वरत्नमयानि |
| वानमन्तराः | असङ्ख्यनगरावासलक्षाणि सर्वरत्नमयानि |
| ज्योतिष्काः | असङ्ख्यविमानलक्षाणि सर्वस्फटिकमयानि |
| सौधर्मसुराः | ३२ विमानलक्षाणि सर्वरत्नमयानि |

एवं यावदनुत्तरविमानानि प्रागुक्त-सङ्ख्यानि वाच्यानि

॥२०-१॥

| जीवाः | अल्पबहुत्वम् |
|---|---|
| पञ्चेन्द्रियाः | सर्वस्तोकाः |
| चतुरिन्द्रियाः | विशेषाधिकाः |
| त्रीन्द्रियाः | विशेषाधिकाः |
| द्वीन्द्रियाः | विशेषाधिकाः |

॥२०-५॥

परमाणुः

- द्रव्यप०
  - अछेद्यः
  - अभेद्यः
  - अदाह्यः
  - अग्राह्यः
- क्षेत्रप०
  - अनर्धः
  - अमध्यः
  - अप्रदेशः
  - अविभाज्यः
- कालप०
  - अवर्णः
  - अगन्धः
  - अरसः
  - अस्पर्शः
- भावप०
  - वर्णमान्
  - गन्धमान्
  - रसमान्
  - स्पर्शमान्

(एवं षोडशभेदाः परमाणोः)

॥२०-८॥

जम्बूद्वीपभरते चतुर्विंशतिजिनानामन्तराणि त्रयोविंशतिः, तेषु प्राक्पश्चिमे-

ष्वष्टस्वष्टसु जिनेषु कालिकश्रुताव्यवच्छेदः । मध्यमसप्तसु जिनान्तरेषु तद्व्यवच्छेदः । सर्वत्रापि व्यवच्छिन्नो दृष्टिवादः । मम पूर्वगतमेकं वर्षसहस्रं स्थास्यति । अवशेषाणां जिनानां केषाञ्चित् सङ्ख्येयकालम्, केषाञ्चित्त्वसङ्ख्येयकालं यावत् पूर्वगतं स्थितमासीत् । मम तीर्थं जम्बूद्वीपभरत एकविंशतिवर्षसहस्राणि यावत् स्थास्यति । अनागतचरमजिनस्य तीर्थं तु यावान् ऋषभजिनकेवलिपर्यायस्तावन्तं कालं स्थास्यति।

चातुर्वर्णाकीर्णः श्रमणसङ्घस्तीर्थम्, तद्यथा- श्रमणाः श्रमण्यः श्रावकाः श्राविकाः। द्वादशाङ्गं गणिपिटकं प्रवचनम्, तद्यथा आचारो यावद् दृष्टिवादः।

॥२०-९॥

द्विविधाश्चारणाः - (१) **विद्याचारणाः-** नित्यषष्ठतपसा पूर्वगतश्रुतेनोत्तरगुणलब्धिं क्षमतो विद्याचारणलब्धिः समुत्पद्यते। स च चप्पुट्टिकात्रयमात्रकालेन त्रिकृत्वो जम्बूद्वीपानुपरिवर्तने समर्थः। तिर्यक् त्वसावेकेनोत्पातेन मानुषोत्तरपर्वते

समवसरति, तत्र चैत्यानि वन्दते, द्वितीयेन नन्दीश्वरे, तत्र चैत्यानि वन्दते, तृतीयेन त्विहागच्छति, अत्र चैत्यानि वन्दते । उर्ध्वमेकेनोत्पादेन नन्दनवनम्, द्वितीयेन पण्डकवनं च समवसरति, तत्र तत्र चैत्यानि वन्दते, तृतीयेनेहागच्छति, अत्र चैत्यानि वन्दते ।

स तस्य स्थानस्यानालोचितेत्यादि प्राग्वत् ।

(२) **जङ्घाचारणाः** - नित्यमनिक्षिप्ताष्टमतपसाऽऽत्मानं भावयतो जङ्घा-

चारणलब्धिः समुत्पद्यते। स चोक्तकालेनैव २१ कृत्वः जम्बूद्वीपानुपरिवर्तने समर्थः । स तिर्यग् एकेनोत्पातेन रुचकवरे द्वीपे समवसरति, तत्र चैत्यानि वन्दते । ततः प्रतिनिवर्त्तमानो नन्दीश्वरे द्वीपे समवसरति, तत्र चैत्यानि वन्दते, तत इहागच्छति, अत्र चैत्यानि वन्दते । उर्ध्वमेकेनोत्पातेन पण्डकवने समवसरति, तत्र चैत्यानि वन्दते। ततः प्रतिनिवर्त्तमानो द्वितीयेनोत्पातेन नन्दनवनं समवसरति, तत्र चैत्यानि वन्दते। तत

इहागच्छति । इह चैत्यानि वन्दते । स तस्य स्थानस्येत्यादि प्राग्वत् ।

| जीवः | नरकः | जघन्यस्थितिः | उत्कृष्टस्थितिः |
|---|---|---|---|
| पर्याप्तासञ्ज्ञि-पञ्चेन्द्रियतिर्यक् | १ | १०,००० वर्षाणि | पल्योपमा-सङ्ख्यभागः |
| सङ्ख्येयवर्षायुः सञ्ज्ञिपर्याप्त-पञ्चेन्द्रियतिर्यक् | १ | १०,००० वर्षाणि | १ सागरोपमम् |
| ” | २ | १ सागरोपमम् | ३ सागरोपमानि |
| ” एवं यावत् | ७ | २२ सागराः | ३३ सागराः |
| सञ्ज्ञिसङ्ख्येय-वर्षायुः पर्याप्तमनुष्यः | १ | १०,००० वर्षाणि | १ सागरोपमम् |
| ” | २ | १ सागरोपमम् | ३ सागराः |
| ” एवं यावत् | ७ | २२ सागराः | ३३ सागराः |

| गतिरागतिः भवः | गतिरागतिः-कालः | |
|---|---|---|
| | जघन्यः | उत्कृष्टः |
| २ | १०००० + अन्तर्मु० | पल्यासङ्ख्यभागः + पूर्वकोटिः |
| जघ० उत्कृ०<br>२ ८ | ” | ४ सागराः + ४ पूर्वकोट्यः |
| २ ८ | १ सागरः + १ अन्तर्मु० | १२ सागराः+४ पूर्वको. |
| ३ ७ | २२ सागराः + २ अन्तर्मु० | ६६ सागराः + ४ पूर्वकोट्यः |
| २ ८ | १०००० वर्षाणि + मासपृथक्त्वम् | ४ सागराः + ४ पूर्वकोट्यः |
| २ ८ | १ सागरः+वर्षपृथक्त्वम् | १२ सागराः+४ पूर्वको. |
| २ | २२ सागराः+ वर्षपृथक्त्वम् | ३३ सागराः + पूर्वको. |

॥२४-२॥

| जीवः | उत्पादस्थानम् | जघन्यस्थितिः | उत्कृष्टस्थितिः | |
|---|---|---|---|---|
| पर्याप्तासञ्ज्ञि- पञ्चेन्द्रियतिर्यक | असुरकुमारः | १०००० वर्षाणि | पल्यो० असङ्ख्ये० | |
| असङ्ख्येयवर्षायुः सञ्ज्ञिपञ्चे०तिर्यक् | ,, | ,, | ३ पल्यो० | |
| सङ्ख्येयवर्षायुः सञ्ज्ञिपञ्चे०तिर्यक् | ,, | ,, | साधिकं १ सागरो० | |
| असङ्ख्येयवर्षायुः सञ्ज्ञिमनुष्यः | ,, | ,, | ३ पल्यो० | |
| पर्याप्तसङ्ख्येयवर्षायुः सञ्ज्ञिमनुष्यः | ,, | ,, | साधिकं १ सागरो० | |
| ॥२४-३॥ असङ्ख्ये० सञ्ज्ञिपञ्चे० तिर्यक् | नागकुमाराः | ,, | देशोन- २ पल्यो० | |
| सङ्ख्ये० सञ्ज्ञि- पञ्चे० तिर्यक् | ,, | ,, | ,, | |

एवमन्यदपि नागकुमारस्थित्यनुसारेणासुरकुमारवन्नेयम्

| | गतिरागतिः-कालः | |
|---|---|---|
| गतिरागतिः भवः | जघन्यः | उत्कृष्टः |
| २ | १०००० वर्षाणि + अन्तर्मुहूर्त्तम् | पल्योपमासङ्ख्येयभागः + पूर्वकोटिः |
| २ | १०००० वर्षाणि + साधिका पूर्वकोटिः | ६ पल्योपमानि |
| जघ. उत्कृ.<br>२ ८ | १०००० वर्षाणि + अन्तर्मुहूर्त्तम् | ४ साधिक सागरोपमानि + ४ पूर्वकोट्यः |
| २ | १०००० वर्षाणि + साधिका पूर्वकोटिः | ६ पल्योपमानि |
| जघ. उत्कृ.<br>२ ८ | १०००० वर्षाणि + अन्तर्मुहूर्त्तम् | ४ साधिकसागरोपमानि + ४ पूर्वकोट्यः |
| २ | १०००० वर्षाणि + साधिका पूर्वकोटिः | देशोन- ५ पल्योपमानि |
| जघ. उत्कृ.<br>२ ८ | १०००० वर्षाणि + अन्तर्मुहूर्त्तम् | देशोन ८ पल्यो० + ४ पूर्वकोट्यः |

॥ २४-४-११॥ एवं यावत् स्तनितकुमारवन्नागकुमारवज्ज्ञेयम् ।

॥२४-१२॥

| जीवः | उत्पादस्थानम् | जघन्यस्थितिः | उत्कृष्टस्थितिः | |
|---|---|---|---|---|
| पृथ्वीकायिकः | पृथ्वीकायिकः | अन्तर्मुहूर्त्तम् | २२००० वर्षाणि | |
| अप्कायिकः | ,, | ,, | ,, | |
| एवं वनस्पतिं यावद्यथायोगं वाच्यम् | | | | |
| द्वीन्द्रियः | पृथ्वीकायकिः | अन्तर्मुहूर्त्तम् | २२००० वर्षाणि | |
| त्रीन्द्रियः | ,, | ,, | ,, | |
| चतुरिन्द्रियः | ,, | ,, | ,, | |
| असञ्ज्ञिपञ्चे०तिर्यक् | ,, | ,, | ,, | |
| सञ्ज्ञिपञ्चे० तिर्यक् | ,, | ,, | ,, | |
| असञ्ज्ञिमनु० | ,, | ,, | ,, | |
| असुरकुमारः | ,, | ,, | ,, | |
| नागकुमारः यावत् स्तनितकुमाराः | ,, | ,, | ,, | |

एवमन्येषामपीशानान्तदेवानां यथायोगं वाच्यम्।

| | गतिरागतिः-कालः | |
|---|---|---|
| गतिरागतिः भवः<br>जघ. — उत्कृ. | जघन्यः | उत्कृष्टः |
| २ असङ्ख्याः | २ अन्तर्मु० | असङ्ख्यकालम् |
| ” | ” | ” |
| | | |
| २ सङ्ख्येयभवः | २ अन्तर्मु० | सङ्ख्येयभवाः |
| ” | ” | ” |
| ” | ” | ” |
| २ ८ | २ अन्तर्मु० | ८८००० वर्षाणि+४ अन्तर्मु० |
| ” | ” | ” |
| ” | ” | ८८००० वर्षाणि+४ पूर्वकोट्यः |
| २ - | १०००० वर्षाणि+अन्त० | साधिकसागरो०+२२००० वर्षाणि |
| २ - | ” | देशोन २ पल्यो०+२२००० वर्षाणि |

॥२४-१३-१९॥

एवमप्कायिकादेश्चतुरिन्द्रियान्त उत्प-द्यमानानामपि स्वस्थित्यनुसारेण वाच्यम् । ॥२४-२०॥

| जीवः | उत्पादस्थानम् | जघन्यस्थितिः | उत्कृष्टस्थितिः | |
|---|---|---|---|---|
| रत्नप्रभानारकः | पञ्चे. तिर्यक् | अन्तर्मु. | पूर्वकोटिः | |
| एवं शर्कराप्रभादिनारकानाश्रित्यापि स्थित्यनुसारेण वाच्यम् । | | | | |
| तमस्तमानारकः | पञ्चे. तिर्यक् | अन्तर्मु. | पूर्वकोटिः | |
| पृथ्वीका० | " | " | " | |
| असञ्ज्ञिपञ्चे०तिर्यक् | " | " | पल्यो०असङ्ख्य० | |
| सञ्ज्ञिपञ्चे० तिर्यक् | " | " | ३ पल्यो० | |
| असञ्ज्ञिमनुष्यः | " | " | पूर्वकोटिः | |
| सङ्ख्येयव० सञ्ज्ञिमनुष्यः | " | " | ३ पल्यो० | |
| असुरकु० | " | " | पूर्वकोटिः | |

एवमन्यदेवानाश्रित्यापि स्वस्थित्यनुसारेण वाच्यम्।

| गतिरागतिः भवः | | गतिरागतिः-कालः | |
|---|---|---|---|
| जघ. | उत्कृ. | जघ. | उत्कृ. |
| २ | ८ | १०००० वर्षाणि + अन्तर्मु. | ४ सागराः + ४ पूर्वको० |
| | | | |
| २ | ६ | २२ सागराः + अन्तर्मु. | ६६ सागराः + ३ पूर्वको० |
| २ | ८ | २ अन्तर्मु० | ८८००० वर्षाणि+४ पूर्वकोट्यः |
| २ | ८ | २ अन्तर्मु० | पल्यो० असङ्ख्य०+पूर्व० पृथ० |
| २ | ८ | २ अन्तर्मु० | ३ पल्यो० + पूर्वकोट्यः |
| २ | ८ | २ अन्तर्मु० | ४ पूर्वकोट्यः + ४ अन्तर्मु० |
| २ | ८ | २ अन्तर्मु० | ३ पल्यो० + पूर्वको० पृथक्त्वम् |
| २ | ८ | २ अन्तर्मु० | ४ साधिकसागराः+४ पूर्वकोट्यः |

॥२४-२१॥

| जीवः | उत्पादस्थानम् | जघन्यस्थितिः | उत्कृष्टस्थितिः | |
|---|---|---|---|---|
| रत्नप्रभानारकः | मनुष्याः | मासपृथक्त्वम् | पूर्वकोटिः | |
| शर्कराप्रभानारकः | ” | वर्षपृथक्त्वम् | ” | |
| एवं यावत्तमापृथ्वीनारकान् यावत् स्वस्थित्यनुसारेण वाच्यम् । | | | | |
| पृथ्वीकायिकः | ” | अन्तर्मु. | पूर्वकोटिः | |
| एवमप्कायादयोऽपि पञ्चे० तिर्यगुद्देशानुसारेण वाच्याः। | | | | |
| असुराः | मनुष्याः | मासपृथक्त्वम् | पूर्वकोटिः | |
| एवं सहस्रारं यावत् स्वस्थित्यनुसारेण वाच्यम् । | | | | |
| आनतदेवाः | मनुष्याः | वर्षपृथक्त्वम् | ” | |
| एवं ग्रैवेयकं यावत् स्वस्थित्यनुसारेण वाच्यम् । | | | | |
| विजयादिसुराः | मनुष्याः | वर्षपृथक्त्वम् | ” | |
| सर्वार्थसिद्धसुराः | ” | ” | ” | |

॥ २४-२२-२४॥ एवं वानमन्तराद्युत्पादमाश्रित्यापि यथायोगं वाच्यम्।

| गतिरागतिः भवः | | गतिरागतिः-कालः | |
| --- | --- | --- | --- |
| जघ. | उत्कृ. | जघ. | उत्कृ. |
| २ | ८ | १०००० वर्षाणि + मासपृथ. | ४ सागराः + ४ पूर्वको० |
| २ | ८ | १०००० वर्षाणि + वर्षपृथ. | १२ सागराः + ४ पूर्वको० |
| २ | ८ | २ अन्तर्मु० | ८८००० वर्षाणि+४ पूर्वकोट्यः |
| २ | ८ | १०००० वर्षाणि + मासपृथ. | ४ सागराः + ४ पूर्वको० |
| २ | ६ | १८ सागराः + वर्षपृथक्त्वम् | ५७ सागराः + ३ पूर्वको० |
| २ | ४ | ३१ सागराः + वर्षपृथक्त्वम् | ६६ सागराः + २ पूर्वको० |
| २ | - | ३३ सागराः + वर्षपृथक्त्वम् | ३३ सागराः + पूर्वको० |

||२५-१||

| योगः | अल्पबहुत्वम् |
|---|---|
| सूक्ष्म-अपर्याप्त-जघन्यः | सर्वस्तोकः |
| बादर-अपर्याप्त-जघन्यः | असङ्ख्यगुणः |
| द्वीन्द्रिय-अपर्याप्त-जघन्यः | असङ्ख्यगुणः |
| त्रीन्द्रिय-अपर्याप्त-जघन्यः | असङ्ख्यगुणः |
| चतु०-अपर्याप्त-जघन्यः | असङ्ख्यगुणः |
| असञ्ज्ञिपञ्चे०अपर्याप्त-जघन्यः | असङ्ख्यगुणः |
| सञ्ज्ञिपञ्चे०अपर्याप्त-जघन्यः | असङ्ख्यगुणः |
| सूक्ष्म-पर्याप्त-जघन्यः | असङ्ख्यगुणः |
| बादर-पर्याप्त-जघन्यः | असङ्ख्यगुणः |
| सूक्ष्म-अपर्याप्त-उत्कृष्टः | असङ्ख्यगुणः |
| बादर-अपर्याप्त-उत्कृष्टः | असङ्ख्यगुणः |
| सूक्ष्म-पर्याप्त-उत्कृष्टः | असङ्ख्यगुणः |
| बादर-पर्याप्त-उत्कृष्टः | असङ्ख्यगुणः |

| | |
|---|---|
| द्वीन्द्रिय-पर्याप्त-जघन्यः | असङ्ख्यगुणः |
| त्रीन्द्रिय-पर्याप्त-जघन्यः | असङ्ख्यगुणः |
| चतु०-पर्याप्त-जघन्यः | असङ्ख्यगुणः |
| असञ्ज्ञिपञ्चे० पर्याप्त-जघन्यः | असङ्ख्यगुणः |
| सञ्ज्ञिपञ्चे०पर्याप्त-जघन्यः | असङ्ख्यगुणः |
| द्वीन्द्रिय-अपर्याप्त-उत्कृष्टः | असङ्ख्यगुणः |
| त्रीन्द्रिय-अपर्याप्त-उत्कृष्टः | असङ्ख्यगुणः |
| चतु०-अपर्याप्त-उत्कृष्टः | असङ्ख्यगुणः |
| असञ्ज्ञिपञ्चे० अपर्याप्त-उत्कृष्टः | असङ्ख्यगुणः |
| सञ्ज्ञिपञ्चे० अपर्याप्त-उत्कृष्टः | असङ्ख्यगुणः |
| द्वीन्द्रिय-पर्याप्त-उत्कृष्टः | असङ्ख्यगुणः |
| त्रीन्द्रिय-पर्याप्त-उत्कृष्टः | असङ्ख्यगुणः |
| चतु०-पर्याप्त-उत्कृष्टः | असङ्ख्यगुणः |
| असञ्ज्ञिपञ्चे० पर्याप्त-उत्कृष्टः | असङ्ख्यगुणः |
| सञ्ज्ञिपञ्चे० पर्याप्त-उत्कृष्टः | असङ्ख्यगुणः |

योगः पञ्चदशविधः - सत्यमनोयोग-प्रभृतिः।

| मनोवाक्काययोगः | अल्पबहुत्वम् |
| --- | --- |
| कार्मणशरीरजघन्यः | सर्वस्तोकः |
| औदरिकमिश्रजघन्यः | असङ्ख्यगुणः |
| वै० मिश्रजघन्यः | असङ्ख्यगुणः |
| औदरिकजघन्यः | असङ्ख्यगुणः |
| वै० जघन्यः | असङ्ख्यगुणः |
| कार्मणउत्कृष्टः | असङ्ख्यगुणः |
| आहारकमिश्रजघन्यः | असङ्ख्यगुणः |
| आहारकमिश्रउत्कृष्टः | असङ्ख्यगुणः |
| औदारिकमिश्रउत्कृष्टः | असङ्ख्यगुणः |
| वैक्रियमिश्रउत्कृष्टः | असङ्ख्यगुणः |
| असत्यामृषामनोयोगजघन्यः | असङ्ख्यगुणः |

| | |
|---|---|
| आहा० जघन्यः | असङ्ख्यगुणः |
| त्रिविधमनोयोगजघन्यः | असङ्ख्यगुणः |
| चतुर्विधवाग्योगजघन्यः | असङ्ख्यगुणः |
| आहारकशरीरउत्कृष्टः | असङ्ख्यगुणः |
| औदारिकशरीरउत्कृष्टः | असङ्ख्यगुणः |
| वैक्रियशरीरउत्कृष्टः | असङ्ख्यगुणः |
| चतुर्विधमनोयोगउत्कृष्टः | असङ्ख्यगुणः |
| चतुर्विधवाग्योगउत्कृष्टः | असङ्ख्यगुणः |

॥२५-५॥

अनागताध्वाऽतीतकालात्समयाधिकः, अतीताध्वा ततः समयन्यूनः ।

॥२५-६॥

निर्ग्रन्थः

| पुलाकः | बकुशः | कुशीलः | निर्ग्रन्थः | स्नातकः |
| --- | --- | --- | --- | --- |
| ज्ञानपु० | आभोगब० | प्रतिसेवनाकु० | प्रथकसमयनि० | अच्छविः |
| दर्शनपु० | अनाभोगब० | कषायकु० | अप्रथम० | अशबलः |
| चारित्रपु० | संवृतब० | एतदुभयोरपि | चरमसमयनि० | अकर्मांशः |
| लिङ्गपु० | असंवृतब० | प्रभेदपञ्चकं | अचरम० | केवली |
| यथासूक्ष्मपु० | यथासूक्ष्म० | पुलाकवत् | यथासूक्ष्मनि० | अपरिश्रावी |

वेदादिद्वारेणैतत्संवेधः श्रुतानुसारेण ज्ञेयः। (दृश्यतां गुरुतत्त्वविनिश्चयः, पञ्चनिर्ग्रन्थी च)

॥२५-७॥

दशविधा प्रतिसेवना - दर्पादिना।

आलोचनादोषा दश - आकम्प्य-इत्यादयः। आलोचकार्हगुणाः - जाति-सम्पन्न इत्यादयो दन्ना आलोचना-प्रतीच्छकगुणाः - आचास्वान् - इत्याद-योऽष्ट। दशविधा सामाचारी - इच्छा-काराद्याः। दशविधं प्रायश्चित्तम् - आलोच-नार्हादि।

- बाह्यतपः
  - अनशनम्
    - इत्वरिकः
      - चतुर्थभक्तादारभ्य षण्मासोपवास-पर्यन्तम्
    - यावत्कथिकः
      - पादोपगमनं भक्तप्रत्याख्यानं च
  - ऊनोदरी
    - भावोनोदरी
      - क्रोधादित्यागः
    - द्रव्योनोदरी
      - उपकरणद्र०
        - १ वस्त्रम्, १ पात्रम् तत्रापि निर्ममत्वम्
      - भक्तपानद्र०
        - ३२ कवलेभ्य एकादिन्यूनाहारः प्राग्वत्
  - इन्द्रियप्रतिसंलीनता
    - श्रोत्रादिविषयप्रचारनिरोधः विषयप्राप्तार्थेषु रागादिनिग्रहः
  - कषायप्रतिसंलीनता
    - क्रोधादिनिरोधः उदयप्राप्तविफलीकरणम्
  - योगप्रतिसंलीनता
    - अकुशलमनोवाग्निरोधः कुशलतदुदीरणम् तदेकाग्रीकरणम्

- भिक्षाचर्या
  - द्रव्याभिग्रहः
  - क्षेत्राभिग्रहः
  - शुद्धैषणा
  - सङ्ख्यादत्तिः

  इत्यादयो यथा औपपातिके
- रसपरित्यागः
  - निर्विकृतिकः
  - प्रणीतरजवर्णनम्
  - रूक्षाहारः

  इत्यादिर्यथा औपपातिके
- कायक्लेशः
  - उत्कटुकासनादिः
  - यथा

  औपपातिके
- प्रतिसंलीनता
  - कायप्रतिसंलीनता
    - सुसमाहितगात्रः कूर्म इव गुप्तेन्द्रियः
  - विविक्तशयनासनसेवनता
    - यदारामादौ स्त्र्यादिरहितवसतौ इत्यादि यथा सोमिलोद्देशके (॥१८-१०॥)

- आभ्यन्तरतपः
  - प्रायश्चित्तम्
    - दशविधम्
      - आलोचनार्हादि
  - विनयः
    - सप्तविधः
      - ज्ञानविनयः
        - पञ्चविधः
          - मतिज्ञान-विनयादिः
      - दर्शनविनयः
        - शुश्रूषणा
          - अनेकविधः
            - सत्कारादिः
        - अनाशातना
          - ४५ विधः
            - अर्हदना-शातनादिः
      - चारित्रविनयः
        - पञ्चविधः
          - सामायिक-चारित्रविनयादिः
      - मनोविनयः
        - प्रशस्तः
          - सप्तविधः
            - (१) अपापकः (२) असावद्यः (३) अक्रियः (४) निरुपक्लेशः (५) अनाश्रवकरः (६) अनायासकरः (७) अभूताभिशङ्कनः
        - अप्रशस्तः
          - सप्तविधः
            - पापकादिः
  - वैयावृत्यम्
    - दशविधम्
      - आचार्यवैयावृत्यादि
  - स्वाध्यायः
    - पञ्चविधः
      - वाचनादिः

- ध्यानम्
  - चतुर्विधम्
    - आर्त्तादि
- व्युत्सर्गः
  - द्रव्यः
    - चतुर्विधम्
      - गण-शरीरोपधि-भक्तपानव्यु०
  - भावः
    - त्रिविधः
      - कषाय-संसार-कर्मव्यु०

- वयोविनयः
  - मनोवत्
- कायविनयः
  - प्रशस्तः
    - सप्तविधः
      - (१) गमनम् (२) स्थानम् (३) निषीदनम्
      - (४) त्वग्वर्त्तनम् (५) उल्लङ्घनम्
      - (६) प्रलङ्घनम् (७) सर्वेन्द्रिययोगयुञ्जनता
  - अप्रशस्तः
    - सप्तविधः
      - अनागुप्तं गमनादिः
- लोकोपचारविनयः
  - सप्तविधः
    - अभ्यासवर्त्तिता
    - परछन्दोऽनुवर्त्तिता
    - कार्यहेतुः
    - कृतप्रतिकृतता
    - आत्मगवेषकता
    - देशकालज्ञता
    - सर्वार्थेष्वप्रतिलोमता

॥३०-१॥

चत्वारः समवसरणाः - (१) क्रियावादी (२) अक्रियावादी (३) अज्ञानिकवादी (४) वैनयिकवादी। लेश्याद्याश्रित्यैषां संवेधः श्रुतानुसारेण विज्ञेयः।

॥३४-१॥

सप्त श्रेण्यः - (१) ऋज्वायता (२) एकतोवक्रा (३) उभयतोवक्रा (४) एकतोखगा (५) उभयतोखगा, (६) चक्रवाला (७) अर्धचक्रवाला।

ऋज्वायतश्रेण्या उत्पद्यमानो जीव एकसमयेन विग्रहेनोत्पद्यते। एकतोवक्र-श्रेण्या द्विसमयेन। उभयतोवक्रश्रेण्या तु त्रिसमयेन। योऽपर्याप्तसूक्ष्मपृथ्वीकायिकोऽधोलोकक्षेत्रनाड्या बाह्यक्षेत्रे समवहन्योर्ध्वलोकक्षेत्रनाड्या बाह्ये क्षेत्रेऽपर्याप्तसूक्ष्मपृथ्वीकायिकतयोत्पद्यति स यावच्चतुःसमयेनापि विग्रहेणोत्पद्यते । एवं तत्तद्दिदिशमाश्रित्य पञ्चसमयाऽपि विग्रहगतिः। सा तु सूत्रे नोक्ता, अविवक्षणात्।

॥४१-१९६॥

तदेवं भदन्त ! तदेवं भदन्त ! इत्युक्त्वा भगवान् गौतमः श्रमण-

भगवन्महावीरं त्रिकृत्वः प्रदक्षिणीकृत्य वन्दित्वा नमस्कृत्यैवमवदत्- भदन्त ! एवमेतत्, तथैतत्, अवितथमेतत्, असन्दिग्धमेतत्, इच्छितमेतत्, प्रतीच्छितमेतत्, इच्छितप्रतीच्छितमेतत्, सत्य एषार्थः, यद्यूयं वदत। - इति कृत्वा अपूर्ववचना खलु अर्हद्भगवन्त एवं मन्यमानो भगवन्तं वन्दित्वा नमस्कृत्य संयमेन तपसाऽऽत्मानं भावयन् विहरति।

मिथ्याऽस्तु दुःसञ्चितं मम। शोधयन्तु बहुश्रुताः। सञ्चयोऽयमाचार्यकल्याणबोधेः कर्मारिशून्यनेत्रे (२०६८) वैक्रमेऽब्दे वैशाखासितप्रतिपदि सम्पन्न इति शम्।

*Don't Miss it.*




आ. श्रीकल्याणबोधिसूरयः

## લાભાર્થી

# શ્રી સુભાનપુરા શ્વે. મૂર્તિ. જૈન સંઘ

સુભાનપુરા, વડોદરા.

જ્ઞાનનિધિના સદ્વ્યય બદલ
શ્રીસંઘ તથા ટ્રસ્ટીઓની
ભૂરી ભૂરી અનુમોદના

